CC0. In Public Domain, Digitizagtion by eGangotri

Sesa Kamalakara
Folios - 183

INDIRA GANDHI NATIONAL CENTRE FOR THE ARTS

| | |
|---|---|
| RECORD NO. 105 | LANGUAGE Sanskrit |
| ROLL NO. 7<br>Date of Filming 1-12-95 | |
| ACC NO. 11765 | SCRIPT Devanagri |
| CATNo. 12315 | |
| Bundle No. | |
| DEC NO. /R. NO. | MATERIAL Paper |
| DESCRITIVE CATALOGUE/TRIENNIAL CATALOGUE VOLUME : IV | |
| AUTHOR JAYADEVA | NO OF FOLIOS ~~PAGES~~ 183 |
| TITLE GĪTAGOVINDA | COMPLETE/INCOMPLETE |
| | DATE V.S. 1685 |
| WITH OR WITHOUT COMMENTARY With commentary by Śeṣa Kamalākara | REMARKS Commt. Śeṣī; scb. Lāla Giradhara; beginning missing. |
| SUBJECT Laghukāvya | LOCATION Vrindaban Research Institute<br>VRINDABAN |

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

।पितरंमेंगनाथार्य्यस्तितोबौचनमाम्यहं।५।।श्रीगीतगोविंदसमुद्रजानिसज्ञाव
रत्नानिरसैकसूत्रे।ग्रथ्नातिशोषाकमलाकरेयंपरीक्ष्यतांतानिविदग्धराजा।६।।
इहखलुजयदेवनामाकविःशृंगाराधिदेवतायुतलोकोत्तरगुणपुरुषोत्तमचरितव
र्णनानुरूपंसर्वरसातिशायितशृंगाररसप्रधानंगीतगोविंदप्रबंधंविदधानोग्रंथप्र
तिपाद्यवस्तुप्रतिपिपादयिषवस्तन्निर्देशरूपंमंगलमाचरति।।७।। मेघैर्मेदुरमंबरंवनभुवःश्या
मास्तमालद्रुमैर्नक्तंभीरुरयंत्वमेवतदिमंराधेगृहंप्रापय।इत्थंनंदनिदेशतश्चलित
योःप्रत्यध्वकुंजद्रुमंराधामाधवयोर्जयंतियमुनाकूलेरहःकेलयः।।राधामाधवयो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ःराधाभिधानायागोपिकायाःमायालक्ष्म्याधवस्यलक्ष्मुंकृष्णस्यचयमुनायाःकालिं
द्याःकूलेतीरेप्रत्यध्वकुंजकुंजमप्रतिमार्गतितागृहंप्रहंगरहःकेलयःरहसिसारसंभोग
क्रीडायाःजयंतिउत्कर्षेणवर्त्ततइत्यर्थः॥राधामाधवयोरितिप्रद्वंद्वजानेनश्रृंगारित
याच्चेलोहरेर्लीलावतारेष्वामनादिष्वोनेकनायिकावर्जनंचाचुर्येणदाशरथिरा
मादप्यतिशयंसूचयतानविनाविप्रलंभेनसंयोगःपुष्टिमर्हतीतिकाषायितेदिवसावदो
द्रुयानुरागोद्भवजतइतिनयाद्वरोधेनसपरिकरेष्वाभिमानानंतरंसंभोगोत्रकाव्येप्रा
धान्येनप्रतिपाद्यतइतिध्वनितंयमुनाकूलइतिचसंकेतवेदिकाकुंडकरवेलनादिप्र

गी·टी·
२

संगेनजातप्रथमावलोकनेनांकुरितस्यवृंदावनगवादिचारणलीलामयवा
दितवेणुनिनादाकर्णनकौतुकसव्याजमंदहसितव्यंजितलावाबंधबद्धितीयदर्श
नेनपल्लवितस्यकुमारिकाजनोचितगौरीव्रताचरणांगमज्जनार्थंकलिंदतनयाव
तरणसमयसमयसमायातरुततीरस्थापितांबरहरणयाचनापदेशनमर्मालापपुष्पितेज
ल्ननिविडितवसनतयासर्वांगीणलावण्यविलोकनेनकुसुमितस्यानुरागस्यदुर्वि
षहविरहसंतप्ततयाकचिदपिस्थातुमशक्नुवत्यासखीरवानीरकुंजकुसुमशयनमा
नीतायाराधायाःकापिनिर्हृतिमत्तमानाया प्रथमतदवलोकनादिषुलग्नप्रदेशादि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शीननात्मानं विनोदयितुमागतस्य श्रीकृष्णस्य च विदग्धसखीविरचितप्रथमसमा
गमफलस्यापि संपादकतया उभयोरपि कालिंदीरोधसः स्पृहणीयतमत्वात् प्रत्यक्षं कुं
जकुसुममिति चकोपेन क्वापि निलीनायां राधायां क्वचिन्मार्गे हिंसपदपंक्तौ तच्चरणन्या
सधियालताशृहशाखिनमुपेत्य पुनः प्रतिनिवृत्तत्वदनवलोकनकृगतेति विचारयत
ः क्वचित् कोकिलनिनदं तदालापमाकलय्य सर्वतः कुंजमहीरुहान्निचितस्तदला
सत्तास्थानरुदितदर्शितप्रलपितविविधावस्थापन्नस्य माधवस्य राधयाऽपि विरह
कातरतया क्वचिदपि स्थातुमशक्नुवत्या सर्वेऽपि कुंजमहीरुहाः उद्वेजकाः आसन्। अत गी॰टी॰ ३

यमिलितयोस्तयोः रतिरमणीयत्वेऽनिकेकमपिहातुमशक्नुवतोः संकेतवसतिविक्र
तात्स्ववन्निलितिरहः केलयोजयंतीत्यनेन चौर्यरतं हि कामिनामत्यंतोत्कंठाविनोदस्था
नं चराणिणानातः परं किंचिदुत्कर्षाधायकमिति व्यज्यते संकेतवसतिप्राशोद्देशगर्भ
विशेषणं। इत्थं नंदनिदेशतश्चलितयोरिति नंदशासितं दयते लिजितात्कर्तृकिर्मणा र
जितं च पृच्छया नंदनीयः श्लाघनीयश्चाशंसनीयो यो निदेशः संदेशस्तस्माच्चलितयो
निर्गतयोः परस्परसखान्यागमनप्रतीक्षमाणयोस्तथा च परस्परं निदेशनिवेदनानं
तरं विस्मृततरो चितकरणीयतया नवस्थितचित्तं नस्थितयोरिति भावः। कथमसौ संदे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शा इत्युतश्चाद्यामेघैरिति।मेघशब्देनात्रलक्षणयामेघसदृशोगाढांधकारोलक्ष्यतेन।
तुवर्षर्तुसूचनं।उत्तरत्रवसंतवर्णनस्योपक्षिप्तत्वात्क्रियमाणरासक्रीडायामवत्तु
र्कलत्वाच्च।आमंत्रणविलक्षितुभद्रोःसमानविषयत्वेनान्यतरोपादानेनैवविवक्षि
तसिद्धेःउभयोपादानंभिन्नविषयार्थंतेनहेराधेयतोमाधवमत्तिस्मरंत्यास्त्वगाढांध
कारादृष्टनयनतयाकोप्यातंकापादकोदृष्टिपथमवतरिष्यति।अथाप्यवतीर्णस्त्वथ
यितमात्त्वीथीपथेनगच्छेत्या।तत्रतत्रनिलेहेरांकां।सर्वंचेतत्संभावनामात्रेणेक्षांव
स्तुतोतिक्रांतसंचारारजनीतिनकापिप्रतिबंधशंका।बहुधात्वमसंकल्पसमागमे



समागमेष्वयंत्वयावंचितइतिजाता।विश्वासशंकस्ततोयंयथात्वांसत्पामनुतेतथास्वरां
संकेतवसतिमनुसरंता।एतस्यसंकेतवसतिप्राप्तावनुरूपतांनवेतिमाधवसखीसंदेहा।
हेमाधवायतोच्यवहन्नवीपरिजनसंचारकालोतिक्रांतः।अयंचनिमित्तान्तरकृतविविधम
न्मथव्यथस्तवानुकंपनायोराधालक्षणोजनस्त्वबहुनायिकावत्त्वतयावधीरणशंक
ततोयथास्यांतद्गुतानस्तवतिंतथात्वामवतुरतोगत्वाइमंजनंप्रतिपालयतावताप्राणामेव
तांजानीहिइतिराधासखीसंदेशश्चेतिवा।उभयोरपिपक्षयोःकारीषोनिरध्यापयतीति
वक्ष्यमर्थाचरणेणिज्वर्थः।गाढांधकारादीनिप्रत्येकमभिसरणहेतुरतानिकिंतुनःसमु
दितानीतिसूचयितुंचकाराप्रयोगः।संकेतवसतिगमनानुरूपतेयाविरहसंतापनिह्नवि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निदानतां द्योतयितुं लाक्षणिकमेव पदद्वयोगः।यद्वा नंदपदस्य नंदगोपेत्र सिद्धत्वान्निर्देशा
भिप्रायं व्याख्याय तदुक्तं तमनौचित्यापादकत्वात्तस्माभीप्याभिप्रायं तु निःप्रयोजकत्वादुपेक्ष्य
।इत्थं हि रागो मानादिकं मतरा प्रबंधप्रतिपाद्यत्वेन प्रत्यक्षं कृत्यनुमिमिति वा साक्षाद्विप्रयोगाख्या
दिध्वनितम परिस्फुरेष्यमाणानंतरं संभोगास्तत्वात्तेनोक्तप्रकारोपपत्त्यादितगाबाधकाशंग
ताध्वनिः।इह सखीमुखेन परस्परसंदर्शाकल्पनेवमेतत् इत्यादिश्लोके राधायाः संकेतवसति
मार्गाज्ञानेन परिभ्रमण निरूपणमुत्तरत्र सखीकथितलक्ष्मवृत्तांतनिरूपणं चान्यत्रानुपपत्तिं
सरससंविधानतां ग्रंथच्छायां च न पश्येयात् इति तत्कल्पनं नंदपदस्य यौगिकतां मननसिज नं
दि सखी प्राह इति षष्ठ्येकविः स्वयमेव स्पष्टयिष्यतीति न किंचिदनुपपन्नं।अत्र चोरसवदलं

गी.टी. ५

कारं मेनिरे।तदिह रसस्य प्राधान्यादलंकरणीयतया नालंकारतो चिंता।यत्र हि संगद्
त्तस्तत्र तथैव प्रतिपद्यत इति नवीनामथ्यत इत्याकामेतत्।काव्यलिंगं तु नातीव चमत्कार
मावहतीत्यस्फुटत्वादुपेक्ष्यं।अतीतायाराधामाधवक्रीडाया अलौकिकत्वेनात्युत्कृतत्वाच्च
स्वसंबंधरहितत्वात्स्वं दर्लसमर्पितत्वाच्च सहृदयैरादरेणात्मानं या चेतसि स्थितः उत वि
वेशानाज्ञाविकमेव वस्तुकं संतानावयामः।न चेदं सचमत्कारं स्फुरत्स्फुरद्रूपतया प्रतिपन्नं रसवत्त्व
तत्त्वेति सचमत्कारप्रतीतेः स्फुरत्स्फुरत्वासाधारणे परित्यागादिचित्रवृत्तांतं तद्वा शेषि
त्वेन विवर्तत्वात्तावत्प्रतिचारिणां चक्रलसविदामिव ममैव नान्यो रेवेत्यादि विशेषपरिहारेण

Dr. Urmila Sharma Collection, Varanasi

साधारण्येन यदा प्रतीतिस्तदा रसवान् । यदा तु स्वगततया विनां प्रतीतिर्न साधारण्येन तत्र यदि
प्रतिपत्तेस्ताटस्थ्येन स्फुटतया तदा भाविकमिति वचनात् ताटस्थ्यं भेदा । तच्च प्रस्तुरेव तत्र र
कात्वं प्रतिपत्तृप्रतीतेस्ता रूप्यापत्त्या विभावादीनां साधारण्येन रसो भाविकं हेतुकां संपद्यते नै
तावता भाविकापलापः संभवति । नतु तथापि रमणीयवस्तुस्वभाववर्णनानुरूपतया स्वभा
वोक्तेर्नातिरिच्येत । नात्र कश्चिद्रूपसंवादः साधारण्यमपि भाविकत्वे किं कवस्तुप्रतीतिराधिक्य
न्यूनं तिमदति भावोक्तिः प्रतीयमानो प्रेक्षास्वं तत्र विप्रतीतिस्तु भ्रांतिरेवा अन्यथा त्वप्रतीत्य
न्यधर्माध्यारोपाभिमानरूपाध्यवसायानामभावात् । शब्दानां जडत्वे हेतुकोन्मत्तिन्यर्थसम

मर्पणात्मा प्रसादाख्यो गुणस्तस्य हेतुरिति तत्रांतन्न विवादः । का पिशाचिकानवकाश इत्य
द्यलंकारविषया विवेचना सुधियां नातिदुरूहा स्फुटा चाकर इति न तत्र तत्र प्रपंच्यते वि
ग्मात्रमेव दर्शितं । शब्दालंकारयमकानुप्रासतत्संसृष्टिसंकरादयस्तु स्पष्टाः सावित्रिका इति
ति पिनोऽभिरख्यातेः संगीतपरिभाषया विविधछंदोमंडिततया इष्टतालोपेततया च हंसना
मायं प्रबंधः । तदुक्तं शार्ङ्गधरदेवेन । छंदसा येन केनापि तालेनेष्टेन गीयते । हंसं तस्य च
पादांते हन्नांतवा स्वरान् क्षिपेत् । स्वरहीनं तदिष्यते इति प्रबंध इतो न रत्रोपद्दिष्टा नार
गतालानां लक्षणानि रत्नाकरे स्पष्टानि । नवतत्वे त्रजेरव वेकश्चिद्विशेष इति नोहं कितानि

गी·टी·
६

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

।इदानींकवितासाम्राज्यकारणशक्तिहेतुभूतसरस्वतीप्रसादनिदानस्वेष्टदेवतास्मरण
रूपंमंगलमाचरन्कर्तव्यंप्रतिजानीते।वाग्देवतेति।वाग्देवतायाःसरस्वत्याश्चरितानिश्ले
षार्थस्फुरणानितानिविचित्राणिआश्रयातिशयाश्चर्यकानिसंजातानिपश्यताहृद्यंप्राग्भवी
यवासनावासितंमनस्तदेवबहुविधकवितानिवासहेतुतयागृहंयस्यसःइत्यर्थः।पद्मावत्याः
उपास्याष्टाक्षरमंत्रदेवतायाश्चरणसपर्याप्रवणतयालब्धविविधवैभवः।श्रियःमाधवास
क्तिविषयत्वाद्राधयावासुदेवस्यचबहुप्रकारपरिकरोपेतसंभोगवर्णनासमेतं।एवंसहृ
दयहृदयहारिणंप्रबंधंकरोतीत्यर्थः।राधायालक्ष्मीत्वंवामप्राप्यमपिस्वयंवरपरामित्य

गी॰टी॰
७

त्रकविरेवस्फुटयिष्यति।अनेनचरसस्तावत्तदाभासस्तावद्भावशांतस्तावोदयस्तावसंधिस्ता
वशबलतारूपार्थशक्तिमूलान्यसंक्रमितवाच्यासंलक्ष्यक्रमव्यंगाख्यवस्त्वलंकाररूप
स्यशब्दशक्त्यर्थशक्त्युत्थशक्तिमूलस्यासंलक्ष्यक्रमव्यंग्याख्यस्यचाभिधामूलध्वनेर्गुण
लंकारोपस्करणीयतयाप्राधान्यात्क्वचित्वस्तुरूपस्यशब्दशक्तिमूलस्यार्थांतरसंक्रमि
तवाच्यात्यंततिरस्कृतवाच्याविधाभिन्नस्यलक्षणामूलध्वनेस्तथात्वात्प्रबंधस्योत्तमता
सूचिता।स्पष्टश्चायंमार्गःश्रीकरस्तेनेद्दशपच्यते।रसाभासस्तावायासौचललितलवंगे
त्यादिवसंतवर्णनायांमंदमारुतादिषुनायकत्वारोपेणवर्णितत्वान्दितव्यो।अन्यत्तु

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथायथमनुत्तरत्वमुत्पादयिष्यते।एवंप्रतिज्ञायरहसिप्रोत्साहनायव्यतिरेकेणकविनि
राकरणपूर्वस्वप्रौढिंचश्लोकद्वयेनप्रकटयतियदिहरीत्यादिस्मायतिरिद्यंतेनावक्ष्य
माणविविधकेलिविशिष्टस्यहरेःसर्वविघ्नपरिहारसमर्थस्यस्मरणेनध्यानेनमने
यदिसरसंसाभिलाषंयदिविलासकलासुनायकामनोहारिव्यापारकौशलेषुकौतुकं
तदामधुरावाक्येत्यकृपदावयरूपमाधुर्यगुणयुक्ताकोमलाल्पनिष्ठुराक्षरप्रायरूप
सौकुमार्यगुणयुक्ताकांताल्पार्थोज्ज्वलरूपकांतियुक्ताचपदावलीयस्यांताहशीशृंगा
ररसाश्रितत्वाच्छृंगारादिविविधपरिकरोपेतनर्मादिकांगसहितकेलिकाहत्वयुक्तां।

गी०टी०
८

जयदेवग्रथितराधामाधवसंबंधिप्रबंधरूपांभारतींशृणुतेत्यर्थः।उमापतिधरना
माकविः।वाचःप्रथयतिअर्थौचित्यंविनाशब्दचित्रमात्रंविस्तारयतिगिरांवाचांसंद
र्भस्तुश्लिष्टार्थग्रथनौचित्यंचातुरींजयदेवएवजानाति।कइसमत्रिव्याहृते।नेवकारेण
ध्ययोगव्यवच्छेदादयंनान्यगामीगुणः।जयदेवेनयोन्यत्रसोपीतिसूचितं।शरणनाम
कविःदुरूहद्रुतेःक्लिष्टार्थकल्पनात्श्लाघ्यःदोषेणैवस्पृहणीयोनगुणेन।शृंगाराद
त्तराणिशृंगारातिरिक्तानिसत्प्रमेयरचनानितैराचार्यगोवर्द्धननाम्नाकविनानकोपि
स्पर्द्धनशीलःशृंगारकवितायांतुयःकश्चिदपितेनस्पर्द्धतइतिव्यतिरेकसूचनात्।अ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चार्यपिदस्थपद्मासनार्थं स्तुतिधरोपि कविः। नाम्नैव पावकत्वप्रतिपादनेन विष्णुतो न गुणे।
नाधोयीनामा कश्चित्पंडितेनानर्थकमात्मनाम परिकृतवान्। किंतु कुसुमं श्लिष्टक
विकृतस्तुत्याक विद्यापतिः कविराजो जात इति द्वितीयश्लोकार्थः। इदानीं पूर्वश्लोके चितम
वतारांतरस्य प्रकृतावतारातिशयं तेषामेके कासाधारणकार्यकर्तृत्वेन प्रकृतेस्फु
ताः हृदशानेकावतानशक्तिः शान्तितया हृदयिंतु भगवति परब्रह्मणि वासुदेवे प्रादुर्भूतमा
नुषसाधारणव्यापारान्निरूपयति। कथमनौचितीन्नहु धिष्ठितिमंदाशंकांतत्र ब्लालिधर्मा
णांतेष्वतेषु चावतारेषु भगवदंगीकरणस्येति द्वाभ्यां पुराणेषु प्रसिद्धैर्निराकर्तुं स्तुतन्ना

गी॰टी॰
९

व्यापारविशिष्टानवतारानाह। प्रलयेति। ८। प्रलयपयोधिजले धृतवानसि वेदं। वि
हितवहित्रचरित्रमखेदं। केशव धृतमीनशरीर जय जगदीश हरे। १। हे धृतमीनशरीर
हे केशव जय जयस्य ते प्राप्तकालः। प्रशंसार्थमत्र अर्थीयवप्रयोज्ये यान्तेन केशवशब्देन
ऊर्ध्वं तत्ता द्विवस्त्रिश्च प्पवदतामस्यादि शरीरं न स्वाभाविकमिति व्यज्यते। धृते।
लीलयांगीकृतं न तु कर्मवशप्राप्तं कृतो न तथैतत्प्राप्तमाह। जगदीशेति। गच्छति नानात्व
मापद्यते तज्जगत् तस्येशाकारणाकरणान्यथाकरणसमर्थस्य तदधीनफलसिद्धीनि क
र्माणि त्वां कथमिव वशीकुर्युरिति भावः। न तु कर्मविशाद्भावेपि प्रलयपयोधिजले वेदोद्धरणस्या

Dr. Urmila Sharma Collection, Varanasi

अथाकर्तुमशक्यत्वात्कार्यार्थं तथा शरीरग्रहणाय कथं लीलेत्यत आह हरे इति । स
कलानर्थनिराकरणनिदानभूतस्मरणस्य प्रलयः क्रियानुलक्ष्य इति भावः । लीलो
पयोगि किं व्यापारमाह । प्रलयेति । प्रलये प्रलयपयोधिजले त्वं अखेदं यथा भवति तथा
वेदं धृतवानसि त्वया जले निवासो हि मत्स्यानामसीष्ठो नितरां पयोधिसंबंधिनि नि
लयं प्रलयकाले न इति विहारोऽस्माद्धकारित्वं प्रलयेन ध्वन्यते । कृतो वेदस्य धारणायेत्य
त आह । विहितेति । यथा नाविकरहितं प्रवहणं समुद्रतरंगाद्धतिवरोगनिमज्जनोन्म
ज्जनोत्सुखमितस्ततो भ्रमति तथाविधं वहित्रमिति भावः । वेदेति । वेदं विहितविकिरणं कल्प गी॰टी॰ १०

नेन धर्माधर्मप्रमाणतया निजस्वरूपप्रकाशकतया चावश्योद्धरणीयत्वं सूचितं । अ
सीति वर्त्तमानमध्यमेनाद्यावतारत्वेऽनंतावतारयोरलंदेवदत्तालीलयातिरश्चोद्धत
वतस्तव मानुषानुकरणं किमाश्चर्यकरमिति सूचितं । अनेन वेदोद्धाररूपदुःकरकार्य
द्विप्रकारित्वेन तद्वृत्तान्तलक्षणो नायकगुणः प्रकृतावतारे सूचितः ॥ ३ ॥ क्षितिरति विपु
लतरे तव तिष्ठति पृष्ठे । धरणिधरणकिणचक्रगरिष्ठे । केशव धृतकच्छपरूप जय जगदी
श हरे ॥ किणं भारवहनादिजन्यं चिह्नं तस्य चक्रं समूहः । कच्छपानां हि पृष्ठभागो ध्यंतं
कठिनतरो भवतीति । तनुत्र एणाधारणयत्र यत्र तत्र तत्र धारणाभाच्छने ततोपसारणं

CC0. In Public Domain, Digitizagtion by eGangotri



जात्यनुकरणार्थमेवेतिभावः॥सर्वाधारतयातिविस्तृतत्वं प्रतिपादयता धरणिशब्देन पृ
थ्विविस्तीर्णता किंवक्तव्येति सूचितं। तिष्ठतीति वर्त्तमानप्रयोगेण फलपर्यंतकार्यनिर्वा
हकतया स्थिरत्वं लक्षणो नायकगुणः सूचितः॥३॥ वसति दशनशिखरे धरणी तव लग्
ना शशिनि कलंककलेव निमग्ना। केशव धृतशूकररूप जय जगदीश हरे॥४॥ शिखर
मग्रं मग्नायाः सर्वाधारत्वं तया धरण्या दंष्ट्राग्रलग्नेनोद्धृतायाः चंद्रमसः कलंकसाम्ये
न दंष्ट्राया महत्त्वातिशयः। वराहजात्यनुकरणं च सूचितं। एवमुत्तरत्रापि द्रष्टव्यं। वसती
ति वर्त्तमानप्रयोगेण दंष्ट्रायाः अनायासेन धरण्युद्धरणसूचनाद्बलातिशयनिरूपणेन

महासत्त्वता लक्षणो नायकगुणः सूचितः॥४॥ तव करकमलवरे नखमद्भुतशृंगं दलि
तहिरण्यकशिपुतनुभृंगं। केशव धृतनरहरिरूप जय जगदीश हरे॥५॥ शृंगमग्रं को
शिः नखयुक्ते लक्षणया प्रांतभागः। अद्भुतशृंगमिति बहुव्रीहौ अद्भुतपदार्थस्याग्रव
र्त्तिपदार्थविशेषणत्वेन शेषोपसर्जनात्वपि वाक्यार्थपर्यवसानत्वात् विषयत्वाद्दार्थ
प्राधान्यं वेदितव्यं। तेन तव करकमलसंबंधिनो नखस्याग्रमाश्चर्यकरमित्यर्थः। क
थमाश्चर्यकरं तदाह दलितेति। दलितो हिरण्यकशिपुतनुरूपो भृंगो भ्रमरो येन तत्त
था। कमलशिखासंबंधात् भ्रमरविदलनं न कचिन्न मिश्रमित्यद्भुतमित्यर्थः। अनेन

Dr. Urmila Sharma Collection, Varanasi

चातिविकटशौर्यशालितया नायके साहसिकत्वातिशयः सूचितः ॥ ७ ॥ छलयसि
विक्रमणे बलिमद्भुतवामन पदनखनीरजनितजनपावन । केशव धृतवामनरूप
जय जगदीश हरे ॥ ८ ॥ अद्भुतवामन कपटबटो बलिं विक्रमणे चरणविक्षेपविषये छलय
सि वंचयसि तत्फलं च तदुपपादनाय हेतुगर्भं विशेषणं पदेति । चरणसंबंधिना नखे
न भागीरथीरूपेण जनितं जनपावनं लोकपावित्र्यं यत्र स तथा प्रथममतिलघुपा
दविन्यासदर्शनेन जातकुतूहलो बलिश्चरणत्रयमितप्रदेशयाचनानंतरं समयं बालक
किं प्रार्थितवानिति विस्मितस्ततः प्रथमपादेन समाक्रांते ब्रह्मांडे सकले द्वितीयेन स

गी॰ टी॰
१२

संत्रमायातब्रह्मविरचितार्घजलप्रवाहसंजनितमंदाकिनीके तु स्वलोकं व्याप्नुव
तिं वंचित इत्यर्थः । सा च वंचना चातुरी इदानीमपि गोपिकाविषये त्वामनुसरतीति
सूचयितुं वर्तमानप्रयोगः ॥ अनेन च नायकस्यानुनयचातुरी सूचिता ॥ ९ ॥ क्षत्रियरु
धिरमये जगदपगतपापं स्नपयसि पयसि शमितभवतापं । केशव धृतभृगुपतिरूप जय
जगदीश हरे ॥ १० ॥ हे क्षत्रियरुधिरप्रक्षतिं तीर्थं लोकत्रयीतापत्रयापहारि परमपु
रुषार्थप्राप्तिसमर्थं च करोषीत्यर्थः । श्रूयते हि पुराणे यत् किल परशुरामः कार्तवीर्य
कोपेन निःक्षत्रियां पृथिवीं विधाय तद्रुधिरेण पितृतर्पणादि कृतवान् । अनेनाज्ञाती

CC0. In Public Domain, Digitizagtion by eGangotri

र्थमपि विरचितवानिति। तादृशा लौकिकलीला निरूपिजनेऽस्तताथयिता। प्रस्ताववता
रघुकुमारलीलासिंहस्ताथर्थकरणं किं वक्तव्यमिति भावः। अनेन च कात्र्वी यद्विनिस्त
तावत्तासहिष्णुत्वं प्रतिपादयता तेजस्विताल्लक्षणो नायकगुणः सूचितः॥८॥ वितर
सि दिक्षु रणे दिक्पतिकमनीयं दशमुखमौलिबलिं रमणीयं। केशवधृतरघुपतिरू
पजय जगदीश हरे।७। रमणीयमिति क्रियाविशेषणं। इन्द्रादयो दिक्पालास्तारावणेनो
पद्रुतास्तद्वधकांक्षिणस्तन्मस्तकबलिदानेन तोषिता इत्यर्थः। अनेन च दिक्पालाकां
क्षितस्य रावणवधरूपस्य महतोऽपि कार्यस्यानायासेन तत्सूज्ञास्त्रपतया संपादनाद्दु

गी॰टी॰ १३

सेकितयागंभीर्यलक्षणो नायकगुणः सूचितः॥८॥ वहसि वपुषि विशदे वसनं ज
लदाभं हलहतिभीतिमिलितयमुनाभं। केशवधृतहलधररूप जय जगदीश हरे।८।
शुभ्रशरीरेण नीलनिवसनधारणव्याजेन सीराघातभयशरणागतकलिंदतनया
सेवितः स्वल्वक्ष्यमाणः प्रयागश्च सर्वकामदोऽजनानामित्यर्थः। अनेनानेकांत्यसूचना
द्धीरललितत्वलक्षणो नायकगुणः सूचितः॥९॥ निंदसि यज्ञविधेरहह श्रुतिजातं। स
दयहृदयदर्शितपशुघातं। केशवधृतबुद्धशरीर जय जगदीश हरे।९। पाखंडानध
पातयितुं पशुहिंसाश्रितं यागविधायि वेदसमूहं दयालुरिव दूषयसीत्यर्थः। दुष्टनिग्रहा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यगीतंस्रवपिरविरुद्धमपितवचरित्रंतोजनयतीतिभावः।एतदेवाह।अहहहेति।उपे
क्षजयति।अनेनचदयावत्त्वलक्षणोनायकगुणःसूचितः॥१०॥म्लेच्छनिवहनिधनेकल
यसिकरवालं।धूमकेतुमिवकिमपिकरालं।केशवधृतकल्किशरीरजयजगदीशहरे॥
१०॥अथधर्मशास्त्रातिक्रान्तम्लेच्छविनाशसूचकंकल्किरूपधारस्यसौर्यम्।अनेनधर्मसं
रक्षणव्रतपरिपालनप्रतिपादनेनदृढव्रतत्वलक्षणोनायकगुणःसूचितः॥१०॥इदा
नीमुक्तदशावतारचरित्रस्यप्रकृतोपयोगमजानानांमन्दधियांकियन्तोबोधनीयाइत्येवमे
वतावद्विचारयेतिनिर्विलम्बमानसआह।श्रीजयदेवकवेरिदमुदितमुदारं।शृणुसु गी॰टी॰ १४

खदंशुभदंभवसारं।केशवधृतदशविधरूपजयजगदीशहरे॥११॥श्रीजयदेवकवेःसुखदं
शास्त्रार्थस्यदृष्टिग्राह्यदर्शित्वादानन्ददंकितत या।विशिष्टफलदंभवसारंजन्मसाफल्यकंउ
दारंप्रौढमुदितंवचनंशृणुइत्यर्थः।मदीयवाक्प्रौढिमन्योज्ञातुमसमर्थइतिभावः॥इदानींन
केवलंत्वंदशावताराधिककार्यकारीतिवक्तव्यतावतारस्यातिशयिता।किंतुपूर्वेषामेतद्दशा
त्मकतयाएतस्यमुख्यतयाप्रीतिसूचनायतानेवानुवदन्प्रस्तुतनमस्काररूपंमंगलमाचर
ति॥१२॥वेदानुद्धरतेजगन्निवहतेभूगोलमुद्बिभ्रतेदैत्यंदारयतेबलिंछलयतेक्षत्रक्षयंकु
र्वतेपौलस्त्यंजयतेहलंकलयतेकारुण्यमातन्वतेम्लेच्छान्मूर्छयतेदशाकृतिकृतेतुभ्यायउ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्येनमः॥२॥दशाश्वतिश्वतेश्शतिकर्तृवाचीशतृप्रत्ययोगेणचतुर्ष्वताप्रकटिता॥सूचितहेतु
प्रतिपादनायसकलसौभाग्यनिदानंलक्ष्मीनारायणौस्तौति॥श्रितेति॥श्रितंकमलाकुच
मंडलंयेनसतथा॥धृतेकुंडलेयेनसतथा॥कलिताधृताउज्ज्वलामनोहरावनमालायेन।
सतथा॥देववि विधशृंगारकेलिलोलुपोहरेलक्ष्मीमनोहारिनृत्तावतारनारायणैकप्र।
तिपादनसंभ्रमेणजयेतिद्विर्वचनं॥अयमपितद्भवितारएवेति॥आशंक्याह॥दिनमणीति गी॰टी॰
॥दिनमणिमंडलंसूर्यमंडलंतस्यमंडनंप्रकाशकमपियावत्॥नहिसकललोकप्रकाशक २५
सूर्यप्रकाशकत्वेनापिसवासनमिथ्याज्ञाननिवर्त्तकत्वंअवतारमात्रस्यसंभवतीत्यर्थः॥

किंत्रमाणमित्याशंक्यशमदमादिसंपन्नविशिष्टादिधेयत्वंमानत्वेनवहुंसुनिज
नेत्याह॥अस्त्वेवंनारायणस्यतुसर्वत्वंतथापिनृसिंहतावतारस्यकिमायातमित्याशं
क्यमानुषमात्राशक्यबाल्यप्रभृतवसिष्ठादीनिरूपेणेनपरिहरति॥कालियेति॥गंजिद्वि
सार्थेनिंद्यादिर्ल्लुडंतः॥विषधरःसर्पः॥विषस्यहिदर्शनादेवमनुष्याबिभ्यतिविशेषतो
बालानितरांतस्यारिणांसर्पाणांनिलमांप्रसिद्धस्यकालियस्यताहशास्यदर्परलनो॥
द्योगेनात्यंतसंत्रमाविष्टनंदादिहर्षजननेनान्यस्याशक्यमिति॥वा॥यमुनाह्रदनिप
तितेत्यक्षेपकद्धकत्वेनज्ञानिहुपागतंतंनिगलितंतस्मिन्हर्षनिर्भरतयाविकासंप्राप्तमितिस्

गा॰

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चनायययुक्तत्वेत्यादिसंबुद्धिः। एवंकार्यतो निरूप्य स्वरूपतो निरूपयति। अमलकमले
ति। अमलं कमलं पुंडरीकं तद्वल्लोचने यस्य स तथा। पुंडरीकाक्ष इति नारायणस्य नाम
संसारस्यजनत्वाद्धुरीधुरीणता चनान्यस्येति। उक्तं कथं साकारस्य परमपुरुषार्थसाधक
त्वेत्याशंक्य त्रिभुवनेत्याद्युक्तं। त्रिलोकीरूपपट्टहस्तार्पितो निधिरचिंतनीयकार्यसाधनं
भवतीति भावः। इदानीं सुजनसाधारणासाधारणधर्मप्रदर्शपितानेक्यं निष्ठिनोति। मधु
मुरेति॥ यथा पूर्वमिंद्रादिप्रार्थनावशेन मधुमुरयोर्विनाशं गरुडासनः कृतवांस्तथेदा
नीमपि नरकासुरस्येति। मधुमुरांतकनरांतकयोरैक्यमिति भावः। नन्तु रामावतारेपि गी॰टी॰ १६

इंद्रजिन्नागपाशबंधनसमये गरुडसहायकाचरणस्मरणानुमुख्यत्वेकस्य दतिक्रमे ह
तुरित्याशंक्य प्रकृतकाव्यप्रतिपाद्यशृंगाररसवर्स्थानवलंबनत्वं सूचयन् देवतानुभाव
प्रकटनेन चावतारस्यमेव द्रढयितुं पूर्वोक्तमपि तमाह जनकसुतेति॥ सीतया त्वं कृतो
नान्येनेति। जटावल्कलादिधारितयातापसवेनशृंगारित्वमेव तावद्दुर्लभं सुतरां दक्षि
णत्वादित्याद्यविशेषणेन सूचितं। जितमपि दूतं निराकृतं दूषणं दोषः पित्राज्ञालंघन
रूपं येन स तथा। तेन राजाज्ञालंगो न विष्यतीति चिंताकुलमतेः सुखं दुरपास्तमिति द्वि
तीयेन। समरे युद्धे शमितोऽतियत्नेन नाशितो रावणो येन स तथा। प्रधानकृता रावणव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धकार्येपिगरुडचक्रगदादीनामपिदिव्यानांसाधनानामभावइतिसूचितायेनाप्रज्ञत
स्यततोविलक्षणप्रमादः॥ अभिनवेति॥ ब॥ अभिनवोमेघोयथाग्रीष्मसंतापहारितया
सकलजनानंददस्तथास्मरशरतापपीडितगोपीजनमनोविनोदनिदानतयासुसं
गतमाद्यविशेषणेनसूचितं। मंदरशैलेनाद्रिगोवर्द्धनाचलः॥ साहश्रेपनलक्ष्यते। अत्या
सपाटवसूचनायइंद्रध्वजमहोत्सवनिराकरणकुपितपुरंदरप्रेरितमहावृष्टिसंत्रस्त गी॰टी॰
गोकुलरक्षणायमंदरोद्धरणान्यासवासनापरवशोद्धृतगोवर्द्धनेनतयाप्रकटीकृतदेव १७
तात्वमावत्वमिति। येनाचकोरोयथाचंद्रदर्शनेनोत्फुल्लहर्षोभवति। तथायमपिलक्ष्मी

रूपानेककामिनीलोलुपतयाविविधशृंगाररसास्वादलिप्सानिरतिमात्रसक्तेनानेकनायि
कावर्जनचातुरीवृत्ति।येनसूचिता।इदानीमवतारतारतम्यनिरूपणायापराधंक्षमस्वेति
प्रणमति।तवचरणेइति।प्रणतावयमितिनावयरुणकरुणाकरत्वंप्रणतेषुजयजयदेवहरे
।तयथातथानवामेवयंतथापिशरणंगताः॥नचशरणगतानामपराधंगणयंतिम
हानुभावाइतिभावः॥एवमनेकाभिप्रायगर्भितेस्मिन्नभिप्रायास्पदतानादंसंतुष्यंतोहर
दयाःसंतुनामनितावतामपरितोषइत्यतआह॥ब॥श्रीजयदेवकवेरिदंकुरुतेमुदं
मंगलमुज्ज्वलगीतिजयजयदेवहरे।८॥ ॥श्री॥मंगलमितिश्रितेत्यारभ्यएतदंतंगीति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतिबंधस्यनाश।एवमुपपादितंनारायणेनेदंश्लक्ष्णचरितंश्रवोपिइच्छन्निममनुसंदधानः।
श्रीहर्षमाधानायमनकलमंगलात्लक्ष्मीनाथंप्रार्थयते।पद्मापयोधरेति।मधुसूदन
स्यउरोवक्षोवः।श्रियंकुरुयतुइतिसंबंधः।अंकितविविधादित्याम्रतयासकलविघ्ननिवार
णक्षमत्वंवक्षसोमधुसूदनस्येतिविशेषणंमतवर्त्तयतिसौजन्यैकनिधानत्वसूचकमा गी॰गो॰
द्यविशेषणंमंगलालयत्वंमुद्रितंह्यतिशायितंरत्नादिगंजीयनकेनचित्द्रष्टुंनशक्य १८
मितिधियामुद्रयंत्यात्तरूपापिगाढाश्लेषसरसकुंकुमांकितकविनकुचयुगमुद्रणंत्व
दिन्याअस्यरूदयंसानुरागसादशीतिवंशतमितिमुद्रितमित्यनेनसूचितं।अनेनचात्र।

पित्राद्यश्लोकवदनेकनायिकासूचनेनसूतं।एतदेवंव्यक्तानुरागमिवतिमुद्रणेपिहेतु
त्वेनसूचयन्नपोह्लयतिनत्वलक्ष्मीपरिरंभणायसंभोगांतसूचकंस्तायंविशेषणं।खे
लनृत्तंनगखेदस्यरतिश्रांतःसंबंधीखेदांबुश्रेणीधर्मजिलविंदुजालकंयस्मिन्ततथा
लक्ष्मीसंभोगजनितरतिशायानंदसंसूचितहृदयोविज्ञापनंसफलयिष्यतीतिभावः।उ
त्प्रेक्षानुप्राणितोरसवदलंकारः।एवमाद्यंतश्लोकात्पांकाव्यार्थबीजमुपक्षिप्यतदेवप्र
पंचयन्राधायाःगृहनिर्गमनसमयएवकृष्णवृत्तांतजिज्ञासयाहरिंप्रेषितासखीप्रत्याग
त्यतस्यैतद्वृत्तांतमुक्तंगतिरेकदेवउवसंतवर्णनपूर्वकमकथयदित्याहावसंतइति।वसंत

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वरीवमेतेराधांसरसमिदश्च च इति संबंधः। सहचरति गच्छतीति न कापि कार्ये ह्रीयत इ
ति व्युत्पत्त्येन सहचरीशब्देन सख्यास्तस्यां तद्विश्वासभूमिता सूचिता। सरसमाश्वासनेऽद्भु
तमिति उत्कंठातिरेकजनकं गूढानि प्रायेण च किमर्थमिव मुक्तवतीत्याह। आश्रमेति प्रति
क्षणोपचीयमानमन्मथया जनितचिंतया जनितया आकुलतया च तद्बाधास्फुरत्पीडां गी॰रा॰
सखीप्रेषणानन्तरं समाधाय कासंनिधानेनोद्वेलमन्मथव्यथाहतानि। किमागतोऽसौ वि १९
ष्यति इदृशपति वा तमिदं विचारयिष्यति वा मद्विषये किंचिदित्यादि विविधचिंतानाव प्रत्य
येनासमाधेयत्वमाकुलतायाः प्रतिपादयता बाधास्फुरणानां प्रतिक्षणं विलक्षणत्वं सूचि

तं। यद्यपि तादृशवैयाकुल्यो दर्शनेन बाधायां अपि किं जहास्येनां न जहामि वेति संदि
हानतया तदानीं तन्नावस्थालिंगायाः कथमकस्मात् सखीप्रेषणमात्रादीदृशीं दशां प्र
पन्नेत्यत आह। आकांतारस्त्यादि बहुप्रकारं विहितं प्रकारांतरदर्शनेनावश्यकतया स
तेन संधानुसरणं ययासा तथा सखीप्रेषणानन्तरं यावत्तदागमनं कचिदपि स्थातुमश
क्नुवत्याः स्वस्थागमनानिश्चितानां स्पष्टतया उद्गमेऽध्वनि कचित् किंचिन्माहश्यपद्मांत्यात
त्र तत्र विलोकयन्तु न विशेषदर्शतिनिहत्यात्मनो गोपानि निदंत्या सह तु चितैवेदृशी दशेति
नावान्नवतिधीरायाविदेकिन्याश्च राधायाः कथं यावत्सखीप्रत्यागमनं स्थातुमशक्तिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कथंवासादृश्यमात्रनिबंधनेनेतस्ततोगतिरित्याशंक्यावयवैश्चित्रमंतामित्यर्थः।हृदय
वस्तुवदनारविंदमितिनयनयोःशोभावस्तुहृक्तिस्तुधामाधुरीमितिश्रोत्रयोगच्छाव
स्तदंतिकमितिचरणयोरालिंगामस्तदंगलतिकामितिमंगानामित्यादिसंदयन्
दयसाक्षिकाभिलाषकारितयासर्वेषामप्यवयवानांसक्तैकतानतयास्वाधीनत्वान् गी॰टी॰
वाद्यथायथातेनयंतितथातथागच्छंत्याःक्वाधैर्यविवेकावितिनावगाविरहसंतापास २०
हनतोद्योतयन्नासंतात्यादिविशेषणमप्येतदेवोज्वलयति।अथचकंदर्पनामंतवसं
तसंबंधिन्यामाधवीलतायाःसंबंधिनिःकुसुमैःमदनबाणतयाप्रसिद्धैःसहइत्यानां

भवयवानांस्वस्वप्राप्तिंकृत्वाचरणंनचित्रमितिकथंचित्क्लिष्टमपिश्लिष्टंबोद्धव्यं
।उपमयामाधवीकुसुमैश्चिवशल्यविरहेणराधायानिजांगगच्छप्यसह्यतादृदितिवं
सुधनिःचक्षिडोडिश्चादसुदानवनिमित्तात्मनेपदातिस्पष्टाहृलदितिसाधु।पनादौ
चरडितिपागतत्सुखसुपतिममासेवस्वद्वचरीतिसाधु।किंतहचश्च्यतक्षाहालति
तत्वंगाति॥७॥हेसखिहरिरिहसरसवसंतेविहरतीतिसंबंधः।सरसानांसाचि
त्ताषाणांप्राप्तमनोरथफलानांकामिनांसुखसवनिवासहेतुत्वे।वसंतेयद्वासरसे।
शस्मक्रीडाविषयाभिलाषयुक्तेतस्मिन्नृत्यतितंत्रमाणोसतिस्वहनातिइरेखुवतिं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जनेनसमंतावत्तुरोधेनविहरतिक्रीडतीत्यर्थः।स्तुवतिजनेनसमंनतुस्वयमितिस्वरवि
शेषसूचितयाकाकातात्तुबकाक्षुविशिष्टानिर्दिश्यनामधेयास्तुदाक्षिण्यमात्रेणलसं
तोचितक्रीडामात्रेणत्वद्विषयोत्कंठाभावमवगमयतीतिभावः।कथमेतदित्यतआह।
विरहिश्वेति।विरहिजनस्यहरतेह्यत्रतस्यातःपरिपाकः।नह्ययमीदृशव्यापारमंतरे
णातिवाहयितुंक्षणमात्रमपिशक्यइतिभावः।रामस्यश्लोकस्यकार्यद्वारात्वंगतार गी॰टी॰
णाभिधानात्पर्यायोक्तं।ननुप्रस्तुतायांत्तश्लोकंगाया।कार्येणक्रीडानादरेणप्रतीतावप्र २१
स्तुतप्रशंसास्यात्कथमयंपर्यायोक्तविषयः।तथाचसूत्रं।अप्रस्तुतात्सामान्यविशेषात्त

र्वेकार्येकारणत्वेसारूप्येचप्रस्तुतप्रतीतावप्रस्तुतप्रशंसेति।उदाहृत्ययोजितंव्या।
ख्याहेतिकार्यकारणप्रतीतौयथा।इंदुर्लिप्तइवांजनेनजडितादृष्टिर्मृगीणामिवप्रम्ला
नारुणिमेवविद्रुमलताश्यामेवहेमप्रभा।कार्कश्यंकलयाचकोकिलवधूकंठेष्विवप्रस्तु
तंसीतायाःपुरतश्चहंतशिखिनांबर्हाःसगर्हाइव।अत्रसंभाव्यमानैरिंद्वादिगतैरंजना
लिप्तत्वादिभिःकार्यरूपैःअप्रस्तुतैःवदनादिसौंदर्यविशेषःकारणरूपोगम्यतइति।स
त्यं।इहकरणापेक्षयाकार्यस्यातिचमत्कारकारितयावर्णनीयत्वेनप्रस्तुतत्वात्पर्यायोक्ते
रुक्तोयत्रवचनतयातत्राप्रस्तुतप्रशंसेतिविवेकः।तथाचयेनत्वंबालकःसास्वंहताधा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



तारुण्यस्तनाःक्ष्कारिणवल्लयोगजासुरवधूजनइत्यादिविवेचनाचद्धोरेस्ददाहारत्य
घन्यत्राप्फल्लेयं।कथंकुरंत्तातत्पाशंक्यवापेतिकधमनिादाललितलवंगलतेति।ललि
तंमनोहरं।लवंगलतापरिशीलनंयस्यतादृशः।अतएवमध्येसंवलितगतिद्धेनकोमले
मंदसंचारीमलयसमीरःमन्नचालवतसमागतोयंमहारथीकामराजोजैत्रयात्रायैइति
सर्वतोप्युद्घोषयन्मलयानिलोयस्मिन्स्तथा।मधुकरनिकरोभ्रमरसंघःतेनकरंबि
तामिश्रितायेकोकिलास्तैः।कूजितंकुंजकुटीरंयस्मिन्सः।कूजितमितिणिजंतान्निष्ठा
घजंतादितद्वाजकोपितादृशःप्रदेशोयत्रनमंदमारुतसंचारोभ्रमरझंकारःकोकिल

कलकजोवानश्रूयतइत्यर्थः।समीरलवंगलतयोःकामिनोःपरस्परविरहकातरत्व
सूचाननकावाक्षान्यषामति।कौतुतिकद्वायावतारोध्वनितः।भ्रमरगुंजतिवंशावा।
हौःसध्रीचीनकोकिलकृतगानसहितमारुतप्रेरितलतांगविक्षेपहुकृतयावसंतन
र्तनमुपपादितं।प्रतिपिपादयिषितायाःश्लोकेगायाःवसंतविशेषणद्वारातिरेकश्च
चनाङ्गमासोक्तिः।इयंतावदनुनयादिसंलापितप्रियतमसमागमानांविरहिणांक
थाप्रवासविरहिवधूनांकिंवक्तव्येत्याह।उन्मदमदनेति।उन्मतोमदोययोस्तादृशौम
हनमनोरथौयस्यतादृशश्चासौपथिकवधूजनश्चतेनजनितःकृतश्चेतनाचेतनसाधार

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एपेनान्येषामुत्पादितश्चविलापश्चानस्थिरोयस्मिन्सतथाभूतनवस्थितदेशविशेषभ
भ्रमणशीलतयासंदेशाहरणादिनापिश्चविचारयेतः प्रवासशीलस्यमंदेवधिष्ठेनो
ह्यमानतयापराधीनिकस्थलावस्थ्यदीनस्यतत्कांतासमूहस्यउन्मत्ततापारान्मादहे
तुमन्मथाविष्टतयोत्कंठातिरेकेचपरिदेवनामवधारणमितिभावः।नचैतावतैवावि
रमतात्याहाश्लिष्टेति।निराकुलोमनोहरोत्पतासंतानाविततवर्षर्तुसर्वस्वेशत्तत्त गी॰टी॰
न्मधुरपिच्छचारमैंद्रजालिकवन्मधुरपिच्छिकाभ्रमणंवाभ्रमरसंघव्याजकुसुममधुर २३
मनोहरनकुलसंघव्याजेनकुर्वन्व्यामोहयती।त्रिमायाविततेवश्लिष्टकलापपदप्रयोगे

एतच्चिंतांचास्मामेवंस्त्रीषुवोत्कंठातिरेकजनकत्वस्यएवस्तनिमित्याशंक्याह।मृगम
देति।रसस्यवशंवदःविमर्शनिरपेक्षसहशापदार्थस्थिरीकरणसमर्थःमृगमद
सौरभरसस्यवशंवदानवदलमालायर्षातादृशास्तमालायस्मिन्निति समासःगत
मालप्रसवास्थिरसौरभेणाकारेणचप्रियतमाललाटचिह्नकंठुकौसंनिधापयंतः
कामिनामुत्कंठातिरेकंजनयंतीतिभावः।किंचातस्यधरूपेषुसाहसातिरेकंवर्ण
यामीत्याह।युवजनेति।स्वीषुकिंचित्सानुक्रोशतयानिवेदनतवानृप्रियाविरहकेल्ककु
युवकस्तुकिंशुककुसुमैःप्रच्युरुधिराक्तमन्मथनखतांतनातैस्तेषांहृदयविदारणमा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घादयन्मदनस्यकुसुमस्वाश्रयनशिक्षापदव्यमावहन्नितिसाहसिक्यमातनोतालि॥
लावानन्तवसंतस्यकथमीदृशायटितघटनसामर्थ्यमित्यतआहामदनमहीप
तातिायोहिनागकेसरकुसुमछलेनाकारणपरापकरणव्रणकामराजाज्ञा
सूचककनकदंडछत्रंबिभ्राणोदंडनायकपदवीप्राप्तःतस्यमहाराजसर्वाधिकारि
पुरुषश्रेष्ठस्येदृशंसामर्थ्यंकिंवक्तव्यमितिलावानकेवलंसखाधिकारिपुरुषए
वकिंचासन्नोपात्याहामिलितेतिामिलिताःशिलामुखायस्मिन्पाटलपटलेतत्र २५
थातथाभ्रमरयुतपाटलकुसुमव्याजेननिरंतरमनन्तयोधसमरंबाणतूणीरधार

णोमनङ्कोदिवंनिकटवर्त्तीतिलावासमष्टिविसंभषुह्नुवर्षनाहृदाहानलंकारानके
वलंविभवगर्वेणवसंतस्यस्वतएवासमाश्यकारिताकिंतुपरिवारदोषादपात्या
हाविगलितलज्जितेतितरुणाःप्राप्तपल्लवाङ्कुरमावस्थाःकरुणाहस्तविशेषाः
हासःपुष्पविकासःविगलितमयगतंपुनःपुनःसंम्रियमाणमप्यस्थिरंलज्जितंय
स्मात्ताहशस्यजगतोनानावस्थापन्नस्यलोकस्यविलोकनेनतरुणेयौवनसंदि॥
ग्धैर्विराधिलक्षणयानिर्दयपरिवारैःनतोहासोपत्रसततथेतितिष्ठंात्वंतनंछेदनं
कृतंभ्रासुधविलासपदंतुरितंउच्चावचंनिर्दयनिजपरिजनतविविधावस्थापन्नज

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नपरिहासेनाव्याहतप्रसरतीतीदृशाकेंतत्तेदृशणाद्युधविशेषत्वासेनापिविरहिजन
नाशेधिकोत्साहो भवतीतिभावः॥ इतनमित्यत्रहुमागमश्छांदसः॥ अवधानतय
पिदृष्टानिरूपयतिमाधविकापरिमलेतिमाधविकावासंतीनवमालिकासत्क
त्ताश्चतिनवमालाधारणपूर्वंमदिरापानासक्ततयाइत्याद्युत्पविवेकशून्यांशम
दिसंपन्नतपोधनानामपिमनांस्फक्षेजयन्कथमन्यान्द्रावयतीतिभावः॥इदृशाने
कानुचितकारीकथंतिष्ठतीत्यतउक्तं॥तरुणेति॥मानिनीनांमानभंजनहेतुकस्वयं
ग्राहादिभोगप्रदानशीलतयाचदयाळुतयावसापराधमानांतरुणानामाशीर्निर्दि २५

ष्टिंनजतीतिभावः॥तरुणेति॥तरतेर्नृनृदहृदादित्युणन्॥ एवंसामान्यतोवसंतसा
मर्थ्यनिरूपणेनराधांप्रतिनव्ययाइत्यन्तवसंतक्रीडाश्रवणमात्रेणमानःकार्यइ
तिसूचयित्वाविशेषतोवृंदावनप्रादुर्भारामणीयकंनिरूपयतिस्फुरदितिस्फुरते
ति॥अतिमुक्तलताछंदकलताकिंवदामिप्रदेशसौभाग्यंयत्रलताअपिविरहका
तराःस्वयंगाढालिंगनपुलकितांगानमकोरकान्सहकारवृक्षान्वितन्वंतीत्यर्थः॥स
मासोक्तिरलंकारःपरिमलसमीपंपरिगतेनगतवेष्टनपूतमनाःप्रमोदकरशिशिर
सुरभिमंदमारुतसंचारबंधुरमितियावत्॥इतस्यवसंतवर्णनस्यप्रयोजनमेप्रयोगं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गर्वपरिहारः पूर्वं दर्शयति। श्रीजयदेवेति। आद्यविशेषणेन गर्वपरिहारः। द्वितीये
न वसंतस्यातिशायितं। तृतीयेन प्रस्तुतोपयोगश्च सूचितः॥ एवं वसंतं वर्णयित्वा अ
द्यपद्यसूचितं तत्संबंधिमंदमारुतकोकिलारवसामर्थ्यं श्लोकद्वयेन क्रमेण प्रपंचय
ति। दरविदलितेति। इह वसंतसौभाग्यवति प्रदेशे केतक्यां गंधस्य बंधुरत्वसद्भा
वप्रसरतो प्रतिहततया सर्वव्यापकत्वतोऽसमबाणस्य विषमशरस्य प्राणसदृशो गंध
वाहो वायुश्चेतो दहति तन्मयतां करोतीत्यर्थः। तत्र हेतुः। दरविदलितेति। दरविदलि २६
ताईषद्विकसिता या मल्ली वल्लिमल्लिका लता तस्याश्चंचत्समुच्छलंतो ये परागास्तैः प्रक

टिता प्रकटवासा सुगंधिता दिशो येनेति। काननानि विपिनानि वासयन् सुरभयन्नित्यर्थः। इहेत्य
नेन सर्वस्यापि प्रदेशस्य वसंतसौभाग्यविशिष्टत्वेन एकाकारत्वात् सहजरामणीयकं। गंधवाह
इत्यनेन सूचकत्वेन संतापजननयोग्यता। केतकीत्यनेन अकारणपरापकरणनिपुणकंटकि
लतासहचरत्वं प्रसरदित्यनेन विप्रलंभैकलक्ष्यतापोद्यविधेयत्वं। दहतीत्यनेन तु नस
जीवनाशंकाभावः। प्रवर्तमानप्रयोगेण सर्वेषां निरवधिश्चन्यतावेत इत्यनेन एवं कदाचिद
न्यप्रज्ञातारितं इत्यघटितघटनासामर्थ्यं च व्यज्यते। दरविदलितेत्यादिना। अथ धविशेष
संमोहनश्चूर्णप्रसारकतया अनुवंचकत्वं करोति। केतकीरूपनायिकासंयोगचिह्नं धारय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न्मंदानिलोमलिकास्तुपसर्पत्स्त्रियाद्दृष्टिभ्रान्तिर्हरति।। काननेषुपरिभ्रमन्निजावमाननसं
तप्तः केवावसंतापयतीतिशुष्ककार्यसमारोपरूपासमासोक्तिः रंतवर्णयति। पथिकेनि
रंतरविदेशसंचारितया प्रतंत्रिरमीसकलजनविविधवस्थापादकतयातिप्रसिद्धावा
सरानितिदृष्टहवमतिनिद्रावद्धेतुतयाश्लाघनीयादिवसानायंते। एकैकं क्षणं युगप्रायं म
न्यमाना निकमपिदिवसं नातिवंति। तेतादृशानेनेकान्कथं तुनेष्यंति किंतुन्नतिवाद्दनाध्य गी॰टी॰
वसायमात्रमाचरंतातिभावः।। कथमेवंवासराणां दुरतिवाहत्वं तत्राह। उन्मीलदिति। २७
उन्मीलन्मिषन्मधुगंधः पुष्परसगंधस्तत्र लुब्धालोलुपायेभ्रमरास्तैर्व्याकुलिताः केपिताय

च्चूतांकुरास्तेषु क्रीडंतो ये कोकिलास्तेषां काकलीकलकलैः सूक्ष्मध्वनिनिकुरणैरधिक
तयाऽउन्नताः कर्णज्वरा येषु ते तथा वसंते। कोकिलानां पंचमप्रसिद्धावपि भ्रमरकंपितत्वाः
रवतया कोपवशात्काकलीउच्चारितेतिसूचयितुं काकलीत्युक्तिः। अनेन चमधुधारसावधि
रणधुरीणसंदष्टाधरपल्लवा निजकांतायाः करव्याधूतिपूर्वपरुषाज्ञामाञ्जरस्मारणेन नि
रतिशयसंतापवशं प्राप्ताइतिभावः।। कथं तर्हि वासरानायंते अत्राह। कथंकथमपी
ति। किंचिदवयवानुस्मरणसंजातशोकमोहोन्मादपरंपारेरंतरांतराजीवनविधिप्राप्ता
ध्यानावधानक्षणोगमिनोद्भुक्तव्रजतप्राणैरपिजीवननिदानतयासादितप्राणसहस्रा

Dr. Urmila Sharma Collection, Varanasi

प्रियतमैः आगतस्समागमरूपाद्भुतरसोल्लासेरतिवाह्यंतस्तितिभावः॥ एवंवसंतमंदमारु
तादीनांउद्दीपकत्वाप्रयादनेनस्वक्षदर्शनातिरिक्तोपायानिवद्धस्पतिंविरहव्यथातिया।
निष्पादितस्तत्वसंतक्रीडायाश्चव्यासंगमात्रसंपादकतयावस्त्वादाक्षिण्यमात्रप्रस्तुतत्वा
त्स्वीयमात्रेमाशंकाभावंशाकूसूचितुंहृदयितुंयदिमांनविश्वसिषितर्हित्वमेवागत्यांत
हितावलोकयेत्यभिप्रायेणाहेत्याह। अनेकनारीति। असौराधायाःस्वसमागमविधिवे गी॰टी॰
पायमित्थंएतयाप्रसिद्धासखाख्यायंते इतिप्रियतथ्यानियेतिवकृत्वाद्यादितप्रियसत्यभा २८
षिणीवयस्याराधिकांखेदादैन्यादिसूक्ततयाअनुकंपनीयांराधांपुनराहपुनर्वभाषइत्य

र्थः॥पुनरुक्तौहेतुगर्भविशेषणं। आरात्दूरेस्थितंमुरारिंसमक्षंनिकटेदर्शयंतीपूर्वम
न्यत्रस्थितांराधांक्रीडाप्रदेशसमीपमाहृतमासन्नप्रदेशमानीयप्रदर्शयंतीतिभावः॥न
नुकथंसरसविनोदमहत्त्वंतत्रत्स्वमुक्तंवितायराधायैसमागमेषिणीमाप्रदर्शितिव
तीत्यतआह।अनेकति॥ अ॥ अनेकनारीतिपरिरंभेतिकर्मषष्ठ्यासमासः।संभ्रमोहमहमि
क्योद्योगस्तेनस्फुरंतःप्रतिक्षणविलक्षणशोभातिशयमादधानास्ताहृशायेमनोहारि
णोहृदयरंजनशीलाविलासाविभ्रमास्तैर्ललितमस्तुकंवातिरेकधारिणंगोपिकानांआलिं
गनानिरासक्रीडेचितससंभ्रमापस्तृतपादविन्यासव्याजेनपरिहरन्नहमहमिकयात्यादयन्

CC0. In Public Domain, Digitizagtion by eGangotri

तासांसान्मूयावलोकनादिविविधकन्दर्पहारिविभ्रमैरपिनामैवंराधायांक्रीडाविनोदमनुन
विष्यामितस्या विविधविलासपात्रतां यास्यामि किं परिहरिष्यामि वा ऽस्ममय राधमित्यादिव
कल्पप्रकारमनोरथपरीतचेतसमान्यैरविलावनीयावस्थं निपुणते विचारगोचरमिति भा
व॥ काव्यलिंगमलंकारः॥ सकलप्रबंधानुवर्त्तितया प्रधाननायिकाया राधिकायांन्नलानु
रागो कंदर्पस्यकदेशप्रतिपिपादयिषितत्वात्तदुपरिनिबद्धवच्चूतायाश्चान्याव्यसमागमक गी॰टी॰
रणबद्धकंकणायाः सख्या निजवयस्यायांतदुत्कर्षस्यावश्यकतया निरूपणीयत्वात्तदुपो २९
द्बलकतया च बहुनायिकावल्लभेन सहान्तरास्वपरागोपवर्णनस्योचितत्वान्नरक्षापरक्षहा

त्वारसान्यासद्वाव्रत्फतबहुनायिकाहृदुल्यातरागकोद्वनिदेवल्लवेदान्यासनान चदक
क्षिणत्वेनपरिहारात्तुल्यानुरक्तेरेव दक्षिणेरक्षितिकेरिश्वत्वान्नानुरागस्यानुत्पत्तेतिस्पष्ट
माकरोत्त्वाद् इति तिङंतप्रतिरूपकमव्ययं किमादि इत्यपत्राह॥ चंदनचर्चितेति॥ निकरः
सारवस्तुसमुदायः॥ हे विलासिनि॥ इहकेलिपरे मुग्धवधू निकरे विलसति तिसंबंधः॥
चंदनचर्चितनीलकलेवरपीतवसनेत्यत्र बहुव्रीहिगर्भः कर्मधारयः॥ वनमालीत्यत्र
दिन्यादिनेता॥ ततः पुनः कर्मधारयः॥ ललममनोनु रंजन चतुर विविध विलासशालिन
याचमेवास्यां क्रीडायामुपचितेति क्रीडामिषेण पदपर्णयोगपत्रे विलासिनीतिसं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ध्यासूचितेकथमेतास्तुपश्यंतीत्युउपसर्पमिमीतिच्छाशंक्यरासक्रीडोऽस्वप्रसंगेनगम
नेनापूर्वामित्युत्तरेकेलिपरेऽस्त्यनेनसूचितेस्वयहृदयसर्पाणांनेतामयिलघुतामाकल
येहरित्याशंक्यत्वद्विषयस्नेहानुरागाधिक्यज्ञाटवप्रसिद्धलयोत्तरेऽस्हेत्यनेनसूचितेक्री
डाव्याजेनोपसृतायामयिकथमेतासुसंनिहितास्विंगितज्ञास्तुचरनावानुबंधव्यनज्ञेला
शंक्यगानाल्लिनयादिचतुरव्यापारव्याजेनव्यंजनंवितानाउंसमर्थाऽस्त्युत्तरेहृगंधेत्यनेन
सूचितेनहिनारीणामस्मिन्विषयेमौग्ध्यंसंभवतीत्याशंक्यतामांप्रत्येकंदाक्षिण्यमात्र
पात्रताप्यस्त्विनाविकमत्पंप्रयोजकंअतोममकिंमयकिंमित्येवंनिजनिजमनस्याजोव

गी०टी०
३०

यंतीनांविज्ञावितमप्यविज्ञावयंतीनांवैदग्ध्यंनप्रतिबंधकमित्युत्तरेश्रेरेनिकरइत्य
नेनसूचितेननुचक्षःश्रेत्यासंगिनिकथमिवनिरपत्रपोपसर्पामिकथंवाज्ञावानुबंध
प्रकाशयामीत्याशंक्यत्वद्विषयोद्वेगनिर्भरिमानसलयानयनानंदकारातीत्युत्तरे
विलसतीत्यनेनसूचितेननुगोपिकानिःक्रीडानिर्भरचेतसित्वमेकस्मिन्कथंचित्वसंना
वनापीत्याशंक्यविरहसंतापोपचारानुलिप्तांगत्वेश्राद्यविशेषणेनहेऽरत्नतेश्रृंगारागत्वे
नान्यथासिद्धाशंकास्तुसवदिवसेपिप्रत्यादिष्टविशेषमंडनत्वसूचकेनविशेषणद्वये
ननिराकृत्यसहजानिरूपाणमाभरणेष्वनादरदर्शनादन्याप्यनुपश्यंतीत्त्वविसंपादनं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इठमाहाकेलीति।।मुग्धस्मितशालिनीति तृतीयासमासः।।आसामतिमधुरास्मृत्नवकेलिषु
लावानुबंधिमंदस्मितलक्ष्यतस्मयरविरचितसंतोषा।।निव्यंजकशिरःकंपज्ञातचलनमा
णिकुंडलकांतिमुक्तकपोलतया निर्वहति।।नचैतदन्यासक्तिव्यतिरेकेण संभवतीति भाव
।।एतदेवतास्तांष्टंगारनिर्भरविचित्रमेषु तत्क्षोदासान्यप्रतिपादनेन दृढयति।।पीनपयोधरेति।
भरेण वशेन सरागमिति क्रियाविशेषणं।।पंचमस्वरविशेषा रागविशेषो वा बद्धिरहो कं
गविनोदार्थं तन्नाममुद्रांकितविरचितपदगानायोपक्रांता ताभ्यांपि निजचित्तानुरंजनोचित
व्यापारेऽन्यलभ्यं विचिंत्य समुचितविचारदक्षा काचिद्दिङ्मुग्धपं वा कुचमौनाग्येन दर्पिता आलिं

गी॰टी॰
३१

गनं पारितोषिकं मन्यमाना सरागमालिंगपस्वयमपि गानमनुकरोति न चायं तां प्रतिलि
चित् प्रतिपद्यत इति भावः।।कापि विलासेति।।अपरा तु तस्याः स्नादृशामपि चापलं विफलं
विलोक्य स्वयं चतुरमना लोचनसौंदर्यगर्विता विलासचपललोचनयोर्नर्तनानि विक
सितसुकलितायां गितवक्र्षुणितवादीनामावर्तनानि तैः सूचितमन्मथविकारं यथा स्या
त्तथा सादरं सुननां मुनां स्वस्थसुखकमलमवलोकयति।।न च फलं प्राप्नोतीति भावः।।कापि
कपोलतलेति।।अन्यानितंबवती कृयोरपि तथाविधयत्नवितथमध्यवसायं तत्पन्हुपायं कृत
लतामात्मनो मन्यमाना रहस्यकथनव्याजेन सविलासं कल्पिपयुगुपागता चारु श्रोत्रे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लाषसूचनं यथा भवति तथा पुलकैरनुकूले कपोले दयितं प्रियतमं चुंबितवतीत्यर्थः॥
कपोलदेशचुंबनेन नायिकावर्जनोद्देश्यतां दयितमिति द्वितीयांतव्यत्ने किं पुलकैरनु
कूले श्लक्ष्णकिंतंगपानत उपुलकितं इति काकुसूचनाद्यदिपुलका उच्छेयुः॥ स्यादेवं चुंबन
स्याफलत्वं न चलेतथेति आदित एव तया ज्ञातमिति भावः॥ अत एव लज्जातिरेकात्पुनर्वदनं
नदर्शयितीति सूचयन्लिउप्पे तदेवोपोद्बलयति केलिकलेति। काचिद्रूपवति रहसि विचक गी·टी·
र्षहरिणा च ग्रशांशंसश्लक्ष्णकरेणाहूय॥ काचिद्युवती रासव्यापारेणोद्गिंतं क्रीडाविनोदम ३२
प्यनादरमादधानं संतापनिहृत्ये यमुनाजलनिकटतया अतिशीतेतीरसंबंधिमनोहर

वानीरकुंजेस्थितं सहराधया वसंतक्रीडाविनोदमनुभवामीति मनसि विधाय संकेतो
पकरणतया निर्गतस्य मम विप्रतीपादेव विघटिततथा मनोरथस्याशंक्य निराकरणात
या तु मतवशात् क्रीडाविनोदं च वदिष्यतिवा का च न तस्येर्तार्थं ग्रहिष्यतिवा तथा तद्वच
नं चारुविचारा सहिष्यते वा मद्दत्तचित्तं महात्तत्सावा किं करोमि किंया वेकथमात्मानमि
तो मोचयामीत्यादि सहृदयहृदयसाक्षिकविविधचिंताकुलतया पुरः प्रतिजातमुकुंको
तिकलाकुतुकेन च या समं नर्त्तं करिष्यामीति नर्त्तनकौशलकौतुकेन देहुनाकरण उक्त
लेउत्तरीयांचले आकृष्टवतीत्यर्थः॥ वादस्य वाचानिराकार्यत्वात् तेन तदंगीकरणेनेयं हर्ष

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निर्त्तरिमानसतयाऽश्लेषवसंपन्नेत्यप्रत्यभिज्ञायमानत्वलिंगं सूचयति। उत्तरपदे च सेत्यस्य
प्रयोगोत्रिवानुकूल॥ करतलतालेति। करतलस्वनं वंश इति केचिद्॥ हि॥ ततः क्रमेधारय॥
रासरसस्य क्रीडाभिलाषस्य सहनर्त्तनकरणाद्येपि सहनर्त्तनरूपफललाभेन तस्यातिश
यितत्वसंपादनेन प्राधान्यात्स्वाधीनेव सहसम्पाश्रागारेगावोवास्यंतां प्रासादेकुतुमानिब
ध्यंतामित्यादिष्वदर्शनाज्जैवप्रस्तुतासहनृत्यपरासहनर्त्तने अधिकतात्पर्यायाविवाद
यान्नश्चवतीसानिजाभिलाषानुमोदनजाताधिकतात्पर्यसिद्धनर्त्तनं क्वणातद्गणीश
स्नेनप्रशंसितेति तिउक्के का। प्रतिवादिप्रशंसायोहेतुरित्याशंक्य करतलेत्याद्युक्तं। करतला। गी०टी० २२

स्तत्यं निवर्त्तयंती चंचलवलयहंदसिंजितैर्मधुरस्वरली निनादसंवादयंती कथं नशंस
नायेतिभाव॥ निजपराजयमप्राप्ताशस्त्रक्रीडाविच्छेदं वांछतो मूर्छितस्येव वैवर्ण्येनाप्रत्य
भिज्ञायमानत्वलिंगं सूचयति। एवमेतासां शृंगारोहुत्तावबंधश्च न्याक्रीडा निरूप्यान्यस्या
वान्नुबंधशालितयापरमरमणीयांतामन्यापदेशेन निरूपयंति। गमनायराधां प्रोत्साहय
ति। श्लिष्यतिकामपमि। श्लिष्यतीत्यादिषु वर्त्तमानसामीप्येलवंतो वेदितव्या। उत्तरपदे
वर्त्तमान एवा ततश्चकावासेप्राप्तसंचितसुचरितपरिपाकायाममप्राप्ति लिंगिष्यति हुविष्ण
तिरमयिष्यति गीतत्वपवाद्यादिनाश्चावर्जयिष्यतिसंभोगप्रार्थनाभिव्यंजकविविधस

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाडवंधिमंदस्मितसंदर्शनीयंचुंबनविक्षेपसंज्ञासूचितरमणीयत्वंतास्वागमनंयथा
स्नवतितथाकश्चित्कल्पितप्रणयकोपव्याजेनगाढंतामनुनयमिषेणगामिष्यतियथा
तथोपलालितासाप्रतिलवोपचीयमानसौभाग्यतयान्ये वाच्येवविलाव्यमानान्नविष्य
तिइतिभावः॥ अमुंचार्थस्वरविशेषसहस्रंततयाचार्थपर्यवस्यन्नपिरूपोद्वलयति॥ य
द्वेवमासांव्यापारेषुशृंखलस्यापेक्षानिरूपणेनोक्तंवितत्वंप्रतिपाद्यमुनेतद्व्यापारव्यत्या
सेनद्रढयति॥ आलिंगनचुंबननर्तनानिअन्याभिःप्रार्थिताद्यन्यास्यःप्रयच्छतितथाइ
गितत्तयास्नतञपातंनेसाविलक्ष्यस्मितरमणीयमन्यामवलोकतेतन्नामग्रहणेजा

गी॰टी॰
३५

पेनकोपेनान्यतोगतायामन्यस्यामन्यामनुयातिकथमेतान्येन्यथासेभावयितुमपिश
क्यतइतिभावः॥ अमुमर्थस्वरविशेषसूचकापिसमन्निव्याहृतान्यार्थपर्यवस्यत्किंश्च
उपोद्बलयति॥ श्रीजयदेवेति॥ पूर्ववादवस्पष्टंविपिनपदंवनचंद्रिकेतिवन्नाध्यायाअस
न्निधानेनविनोदवैफल्यंसूचयति॥ एवंश्लोकंव्यतिरेकनिरूपणेनसूचितमुपसर्पणं
आवश्यकदेहलूपन्यासेनद्रढयति॥ विष्ठेषामनुरंजनेतिनेति॥ हेसखिमंयोमुग्धोहरिः
छंदंक्रीडतिवंब्रजेतिसंबंधः॥ सखीतिसंबोधनेनहितसत्यप्रियभाषणविषयत्वादिभाव
दनेनकरोमीतिमदयतिजनानांमनोसीत्फन्मादाध्यादकतयाविरहिषुवसंतस्यातिकठिन

Dr. Urmila Sharma Collection, Varanasi

त्वंचव्यज्यते।मुग्धोमोहंप्राप्तःकर्त्तव्याकर्त्तव्यविवेकशून्यउक्तोता।स्वच्छंदतालगाति
वाह्यातिक्रमणस्वेच्छामात्रेणक्रीडतिस्वरिस्वेवसंतक्रीडावासनावशेनकरचरणा
दिविन्यासमात्रंकरोतिअनेनायंप्रतीक्षणसमयइतिभावः।नववासोऽस्त्दयद्वारिविल
संदर्शनिपारवश्यान्नवधाऽस्पादितत्राह।सुंदरीनिरित्यादि।मोहसमुदयस्समसमया
वेगप्रधाविता।निःकिंकिमिदमितिविस्मिताऽनिर्निजनिजसौंदर्यगर्वेणस्वस्वादर्शनिस्व गी॰टी॰ ३५
तामवस्थांमन्यमानानिःपरितःप्रतीकमाश्लिष्टानकामपिअवलोकनेनापिनाष्ठता
नजानातिकेवलंसकलसौभाग्यमूर्त्तिःकदापितद्वचेतनतयाऽप्रसिद्धांच्छेष्टांविविध

वस्थासंपादकोस्तिखिद्यमनिन्नविज्ञंवाऽशक्यः।शृंगाररसएवोत्प्रेक्षणीयः।कथमेवं
संभावयितुंशक्यइतिभावः।तथापिकथयकथंबहुनायिकावस्त्रसख्येदृशादृशाम
हिरहजनीतिवेत्याशंक्याह।विश्लेषामितिविश्लेषामितिकर्मणिषष्ठी।अनुरंजनंसवि
नयावर्जनं।इतस्ततोगच्छंतीमधुकरपंक्तीराधायैनिवेदयतमदीयांदशामितिमौलि
विरचितांजलिपुटेयाचते।आलिसख्यमागच्छतपंचममुदंचयंतपिकसंवयंसमादिष्टा
किंतयासंदिष्टमितिवदंतीतिकांजलिंकर्णेनात्यल्पयति।विविधकुसुमगंधबंधुरांमंद
समीरपरंपरांवदागमनप्रियनिवेदिकाइतिकेतिउष्ठायोद्धायालिंगतात्यादिचेतन

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चेतनविषयमरुद्दयरुदयहारिण्यापारेणधन्यास्खलुराधायस्याञ्जेतयमीदृशीदशा
मनुभवतिगुणरश्चायंयस्तथाविधस्त्रीरत्नविषयभावानुबंधनेनकदर्थ्यतिश्रतिसङ्
चितपरस्पराऽनुरागदर्शनसंजातानंदसंदोहेनकेनवानेदंविसंभावितमितिभावः॥न
नुकथमकांडएववृद्धाङ्गिएपमपिसंत्यज्यप्रयंपतीषेवितासुभ्रुवस्त्वंतोरेप्रपन्नइत्यतआ
हइंदीवरेतिकदाप्यनवच्छूनचरश्चचिरस्कृतयाविदितपांडिमसंतापादिनिरोगेःप्राग
नवरतलब्धचदालिंगनादिसौभाग्यतयाऽधुनाबहुलत्वतयातत्तद्विषयकोत्कंठाति
रेकसुच्छूजयरिंरवयवैरविदितांगखेदकंदर्पजनितकार्श्यपांडिमश्यामितरुदितप्रलपि

गी॰टी॰
३६

तादिकंचन्निमिशतयातिरमणीयंदशाविशेषमुद्वहन्कथंनतथास्यादितिभावः॥अ
न्याहितापादकतयेतिपा॰॥कचिदतदनंतरमद्योऽसंगेतिश्लोकःपश्चतेतस्यार्थः॥आ
त्याहितप्रतिपादनेनापिश्लांतिकामनंनिश्चापयति॥अद्योऽसंगेति॥अद्येतिक्षणम
नस्यापीहशात्पततापादकतयासकलदिनायमानत्वात्तदुरतिवादत्वं॥अखंडाशेले
ति॥सुलगप्रदेशनिवासितयासंपन्नविच्छुवंननिजेतुशक्यमस्मादितिव्यक्तत्वेनानिल
शब्देनसार्वत्रिकत्वादप्रतीकार्यताचव्यज्यते॥ऊऽसंगवसदिति॥पालनपोषणादिनासं
वर्धितानांकुटिलिकस्वभावानांसर्पाणामनुचितापकारसंतापखेदादिवेद्यर्थः॥इ

Dr. Urmila Sharma Collection, Varanasi

ज्ञाचलं हिमाचलं।तत्रहितेनतपाःस्वतंतत्संबंधकार्त्रीनेनोगिचूषणतयास्तपापकार
निराकरणक्षमत्वायविषपीडिताहिशीतलोपचारमपेक्षंतइतिभावः।अनेनचबा
ह्नविधसंपत्तिगर्विततयाशुक्काशुक्कविचारविधुरोविश्वासघातित्तुजंगक्षतदाहरवि
त्नोमंदानिलस्त्रसमाननामधेयानपिमल्लयाद्राहिमालयेविश्रुशान्विचरतातिसू
चितंनचेतावदेवेत्याह।किंचेति।विप्रलब्धान्पाहिताञ्जिसचिह्नतयाविस्मृतसंनिः गी०र०
हितानिष्टस्मरणसूचनार्थः।किंचशाखाः।अनेनचनिजवयस्यरूपेणचूतेनाग्रभाग ३७
स्थितमुकुलव्याजेनमौलिसंघहितांजलिबंधंविरहिणोवंचयेतियाचितंविचार्य

निजाभिमतकार्ययाचनसंजातसंतोषणानांकोकिलानांअतिशयंकलस्वरो।
त्वणावाचोवंचयामोवंचयामस्फुटंचेतातिविस्मापनार्थंप्रवृत्तिकरूक्तराष्ट्रे
नसूचितंनचैषांबहुकंकणानामपकारत्ववर्णानामणुमात्रमप्यवधारणं त्वं
हिरहकातरणानेनकर्तुंशक्यमितिभावः।कश्चिद्वयस्योकतन्मीलदित्यनंतरं
पद्यतेतत्रेदानींतनमंदमारुतकोकिलारावयोःस्मरसवसंतसंबंधिदक्षिणपवन
पिकारावावेलक्षणप्रतिपादकतयावतायेत्रिराध्येवव्याख्येयः।स्मरखीनचनश्र
वणसमुदितावगातिरकायाराधयाः स्वस्वसमागमप्रतिपादयन्सर्गातंसूचय

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

तिरासोल्लासभरेणेतिस्वभावतोमुग्धानांरासक्रीडोत्सवापहृतचित्ततयाप्रख्या
पारविनावनविमुखानांगोपिकानांरासक्रीडोत्सवापहृतासमीपेस्वविषयप्रेमा
तिशयनिवासत्वमितयातिस्पृहणीयसुरतव्यग्रतयातिशयवशाविगलितलज्जतया
समीपस्थानप्यनवलोकयंत्याराधयागाढमालिंगितस्तदालिंगनवशेनवसंज्ञात
नयननिमीलनःसन्क्षोविरहसंतापनिर्हृत्तिनिदानालिंगनेनतदागमनंसंभावि
तमप्यात्मनोऽञ्जलिप्रार्थनाविषयतयासंभावितमचक्षमाणोनयनयोन्मीलनात्
पिसंजाताशंकस्तथापितच्छिदित्वानिवेदयाम्यस्मैनिजागमनमितिधियाविविध

गी·टी·
२८

मधुरोक्तिनिदानंतवाननममृतप्रसूतिकिंचुक्तमित्यभिधायपतईदृशंरसातिरेकशा
लिंगीतच्चुम्बतीतिसाधुवदोपचितवदनोपलालननिमिषेणगाढंचुंबितःसहशमी
दृशेनसरसगानेनवल्लवीजनचित्तमावर्जयसीतिसोत्प्रासंगिनिप्रशंसाभिसंधि
नातिरमणीयममृतमयद्रवमयतवाननमितिसानुरागमभिधायसाभिलाषंचुं
बितोवासाधुसाधुविविधभावबंधुरेणानेनप्रस्तुतालापेनगानेनानंदयसिमम
मानसमितिगातिस्तुतिमिषेणकमनीयममृतद्रवमयंचुंबनस्पृहातिरेकजनकं
तवाननमित्यभिधायाप्तनरुक्ताभिलाषंचुंबितवीत्यतर्किततत्परीरंभादिसोन्म

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गल्लात्संजातानेकविधानंदव्यंजकमंदस्मितस्तनगोत्सुष्मान्पात्वित्यर्थः॥
८॥ इतिश्रीशेषकमलाकरविरचितायां साहित्यरत्नमालायां गीतगोविंदव्याख्या
यां प्रथमःसर्गः॥ ॥८॥ ॥एवमाद्योपश्लिष्टसेर्ष्याभिमानानंतरसंभोगस्यपरिप
करतयासंकेतवसतिमार्गभ्रांतिसंजातविरहोत्कंठितयोराधामाधवयोरासक्री
डाप्रसंगेनसमागमेनिरूप्येदानींक्रीडाप्रसंगनाप्यगोपिकासंनिधानासहत
याकोपेनान्यतोगतायाःसंभ्रांतरागाधिकेनानुगतच्छायाराधायाअवस्थामपितच्छ
पर्यागितयाह॥ विहरतिवनेइति॥ असाधारणवर्णयेहारोविगलितनिजोत्कर्षा

गी॰टी॰
३९

दीर्घ्यविशेनान्यतोगतादीनोस्होपिसखीमनुवाचेतिसंबंधः॥ निरुपमराधाविषय
प्रणयशालिनिसोत्कागेपकनिधानेअश्लेषस्वसंनिधानन्यथामंदहसिताप्रकाशने
सोत्कंठवचनाव्यंजनेसाकूतावलोकनासूचनमित्यादिस्वालाविकबहुमानस्खल
नहेतुकेष्यविशीर्णतयापराधानपराधविवेकशून्याप्रदृष्टस्यपेक्षःस्खलितम
विषद्यंहित्तवतीतिरात्यातदनुनयावधीरणेनान्यतागतात्क्षणमात्रमपिश्लेषवि
रहेणस्थातुमशक्नुवती किंमयामंदधियाकृतमित्यनुतप्ततयादिक्षुमनुसरंतीक्षणे
पायांतरागतधैर्याराधामोनिनानामतिगोपनीयमपिलब्धविश्रंभावयस्यांबन्नापरु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्यर्थः॥स्वल्पस्तथा किमर्थं स्थितवानित्याशंकानिराकरणाय वने विहरंतीति हेतुगर्भं
विशेषणं॥रासक्रीडावशेन तथात्वद्दिति भावः॥ननु तथाप्युपितामाते न सखीपथप्र
दर्शनादिना किमिति नानुनीतेत्याशंक्याह क्वचिदिति॥संकेतवसतितया कदाप्य
प्रसिद्धे निविडलताहते कुटीरांतर्हिता नाकथिता द्रष्टुं शक्येति भावः॥ननु कथं वयस्यो
पदेशादिकमंतरेणैव तादृशकोपानंतरमनुतापोदय इत्याशंक्याह॥कुंज इति॥अव्य गी०टी० ४०
क्ततया बहुतया कोपवशेन प्रविष्टया न तया न तत्र स्थो॥विघ्नशंकापादकासमाधेयमधु
पानरतत्वमरसंघस्तनिनदव्याजायलागं तयाकोपवशेन प्रविष्टया न तया न तत्र स्थाउं

नापिततोन्यत्र गंतुं शक्यमित्यकंचित एवाहतताप इति भावः॥किंतु वाचेत्यत आह॥संच
रदधरेति॥रासे विहितविलासेनांऽहासितलिताभावेपि स्मरणादन्यथारुदयंगमत्वं
मनाक्स्मरतीति स्तुतलनडत्नस्त्वैंविदकचतुरस्यापि विशेषोक्तंगतिरकादस्य तेत्रद्वे
॥हरिमिति द्वितीयाप्राधान्यं बोधयंती सकलानामपीद्रियाणामेतत्स्त्रवणतया व्याप
रांतरनिहनिं च व्यनक्ति॥ननु कथं चंद्रीयं मनो निरपत्रपं यत्तथा सापराधमपि तमनुस्म
रतीत्यत आह॥मामतीमच्छिन्नपरीक्षणाय विनोदमात्रं तन्नापराध इति भावः॥कथं ते
विलासा इत्यत आह॥संचरदिति॥संचरेताधरे स्थितेवान्यत्राप्याविर्भविता याऽधर

Dr. Urmila Sharma Collection, Varanasi

सुधातयामधुरायेध्वनयः।तैर्हरिवरितः श्लाघयितो मोहनोरमणीयो वंशो येन स तथा
।तदधरसुधामाधुरीरंजितवंशनिनादः कस्य वा न चित्तमाकर्षतीति भावः।। एवं दूरा
दपि वादनस्याकर्षकत्वमभिधाय संनिहितानां तादृशस्य दर्शनादपि वशप्यत्वमाह
।चलितेति।चलितदृगंचलादौ बहुव्रीहिगर्भितकर्मधारयः।वेणुवादनसमये जाय
मानेन सहजेन नयनप्रांतवलनेन संनिहितानां साकूतावलोकितसुरसास्वादन
मिव स्वादयंतं मौलिचलनेन तासां शृंगारचेष्टासु संतोषमिव व्यंजयंतं कपोलावलंबिकुंड
लनेनापि तासां विविधभावानुबंधेषु पारवश्यमिव विलोचयंतं चांतरेण वा भावान्यत्र। गी॰टी॰ ४१

क्षणमपि स्थातुं समर्थेति भावः।। निर्मल्यं नयनश्रियस्तु वलयं वक्रस्य दासस्याशा चतु
सुगमस्य स्मिना भिमन्मथधनुर्ज्योत्स्ना स्मितस्याचलः।। संगीतस्य च मत्तकोकिलकुलाभि
स्तुच्छिष्टमेण इत्यः सर्वांगीणमहो विधिः परिणतं विज्ञानचित्रं चिरादित्यादौ निर्माल्य
दामानां गौरणहृत्विव्यपाश्रयाणां सात्त्विकायाणामानंददायिनां निवहात्सुवासं वसं
चरदित्यस्य हृदशावीवादितव्यः। एवमन्यत्रापि सुधियां स्वयमूहनीयं ध्वनिमाधुर्येण वस्तु
नाधरसुधाहेतुकतारूपोत्प्रेक्षाध्वनिः ताद्दृगंचलवलनादि वस्तुना साकूतावलोक
नादिवस्तुध्वननात् तस्य च हेतुत्वेन संभावनाउत्प्रेक्षाध्वनिः।। संतु तावदेवं सरसहृदयं।

गमास्तावास्तकालीनोविषोपिकिंवक्तव्यइत्याह।चंद्रकचाविति।गोपवेषोचितवि
चित्रवर्हबर्हततिपर्यंतवेष्टितकेशकलापतयाइंद्रायुधशोभितसांद्रमेघइवमेघ
लोकेस्तवतिसुखिनोप्यन्यथाहइन्त्रिचेतइतिरीत्याकस्यमोनाविकारयतीत्यर्थः॥अ
स्तोतावन्नवंगीणानिरूप्यनिरूपमानरचिताविशेषवेष्टितकेशस्तारसौंदर्यमवता
वन्मन्मनोनविस्मरतीतिस्तावा॥अधरमोस्तागप्रमाह।गोपकदंबतीति।गोपकदंबोव्रज गी॰टी॰
ःबंधुजीवस्यमधुरःस्पृहणीयःअपिनामेहशंमाधुर्यंममस्यादितिप्रत्यभिलषणीयः। ४२
अधरपल्लवोयस्येतिस्तमासार्थः॥किंवदामिमंदरागपाकोपलज्जाग्रहस्तत्तयाव

धारिततदानीतननतदुपलालनानितंबस्तारात्नस्तविलासागतव्रजसुंदरीकदंबकनि
जमुखचुंबनस्तुबिस्त्रीकृतमन्मुखचुंबनस्पृहंतमनादृतवतीअत्मनोबुद्धिमांद्यमिति
स्तावः॥निष्क्रिनोमितस्यान्यत्रानादरंयत्रास्तुमुखचुंबनमपेक्षमाणास्तुकथमेताममा
न्यासंगंनजानंतीतिमयिदाक्षिण्यातिशयंमाविष्कुर्वन्मंदस्मितसुखंदरहसितवताविं
स्तुहसितेतिविशेषणंद्योतयतिसर्वातिशायिनिजरूपेणयसौस्तागप्रवकुंमन्यासां
व्यापारानुपक्षिपति।विद्युल्लतुल्लकेति।विद्युल्लावकुल्लाःस्तुल्लकारामोवायस्यताहशो
भुजपल्लवोयस्यताहशंवलयितंपरितोरस्वामंडलाकारस्तंतवेष्टनेस्तुवतिसहस्रतक

CC0. In Public Domain, Digitizagtion by eGangotri

णीसदृश्यं यस्येति समासार्थः॥ क्रीडारसे समुत्पन्नालिंगनाभिलाषसूचककोमलभुजे
गतारामांचे तरुणीजनमालोक्य करचरणोरस्खलद्धृतकेयूरकटकहारकोतिभुं
जेन तमोपसारयंतं तस्य वियात्यं परिहृतं रतमिव मयि बहुमानं सूचयंतं न ज्ञातवता॥
ति भावः॥ ललाटरुद्दयसौलागयमाह॥ जलदपटलेति जलदपटलेन चलदिंदो विनिंद
कश्चंदनबिंदुर्यस्य तादृशो ललाटेऽस्त्विलिकं यस्येति समासार्थः॥ निकटवर्त्तिचंद्रजचं गी॰टी॰
द्रबिंबं मेघमंडलमिव दर्शनीयावयमेवारुनवद्मासंजातो दालनसंघट्टितवर्त्तुलचंदन ४३
तिलकमतिशयामं ललाटतटं उन्नतनिविडकुचतटहठसंघट्टनकठिनं विस्तीर्णवक्षो

वक्षोप्यवलोक्य कावाहनतस्रण्णचुंबनगाढालिंगनात्स्यामात्मानं वंचयिष्यतीति॥
भावः॥ एवं क्रीडाकाले नज्ञस्मालिङ्ग्य निकृष्य सद्योगतालिनिक्षपं निकृष्यति।
परिमिताल्लकारितया विनातवेषं॥ सवागातं ब्रादिदेवनारदादिष्वपि निषुधिभ्रिरा
दिमहद्भ्यप्रकाशायहतुरश्रेष्ठपरिवीतं सूचयति मया विनाहतरासक्रीडाव्यलीक
जनितविमनस्येपि दाक्षिण्येन तन्न हिन्नापेनादर्शावधानं सर्वविस्ठास्वपि निरूप
धिसौहार्द्दप्रकटनपटीयांसं प्राप्य कावा प्रतिकूलादिवाक्षणमात्रमपि नयनायावै
फल्यमनुभावयिष्यतीति भावः॥ आस्तां तावदन्यस्मिन्विषयप्रणयबहुमानादपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदी।योद्धविदग्धयानालोचिता विस्पाह। विशदकदंबेति। कदंबोत्र धूलीकदंबस्ते
नवसंततकाहर्निर्यः। कोमारेत्यत्रेवनात्तुचिता। विशादविज्ञानतया मनःप्रसादक
रिकदंबतले मिलितं व्याजसंपादनेन क्रीडाप्रादेशादागत्य मया सह संगतं मां विना
शतवसंतक्रीडालक्षणापराधसंजातकलहोदितविच्छसाधुसंसाविवादेः शमयं
तं कोपदुःशमुद्रितसौहार्दयावामशीलया गरुदिका निरूपकं गतया हामपरुष गी॰टी॰
हराणफचारंयत्याऽपि मम मनः कंदर्पदनंगसूचकनावलोकानननिरतिशयानं ४४
दनरतिसुख्यामयं तं कथमधुना तं तन्न स्मरिष्यति केवलं तन्निराधं वितत्वानाहमेव

ऋष्टेति भावः। अतस्याऽस्य सवर्णनस्य विशेषणद्वारा प्रस्तुतोपयोगं सूचयन् गर्व
परिहारमिषेणातिशायितामाह। श्रीजयदेवेति। संप्रति सुखप्रवर्तानूतनतया
ऽऽहरीणसुखपानामित्यर्थः। एवं निजविषयकहरिप्रणयबहुमानयोर्निरंतरतास्व
लघुताशंकापरिहाराय निरूप्यात्मनोपि प्रणयानुरंगावस्थामाह। गणयतिगुण
भामं ग्राममिति। पुनरपि मनः श्लेकामं करोति किं करामीति संबंधः। प्रणयखेदादैन्य
द्याकुलतया संनिहितायाऽपि सख्याऽनवलोकनादसंबोधनेऽनवधानातिश
यं मनःक्षणमात्रमपि नात्र संनिहिता नामपि मामकीनामिदानींतनामवस्थां विच

Dr. Urmila Sharma Collection, Varanasi

रयति।किंतुतस्त्रवणमेवसंपन्नमितिइदंममेत्यनयोरुक्तिश्चव्यनक्ति।प्रथमंत
वन्निरपराधेप्रथितप्रेमाबंधेहाह्निएवतिष्ठतोपलालनेनतुखोपनतेदयितेहुर
भिमानेनमांप्रापय्येदृशींदशामानीतवत्।अधुनाचस्वयंचिन्ताकर्षणनिपुणेऽङ्ग
ङ्गीकामयतइतिकिंवदामित्रपितुतद्विषयंमनोरथमपिधच्छलतयाश्लिष्टितत्मे गी॰टी॰
मन्यमानंकीदृशीमवस्थांप्राप्यिष्यतिनजानामीतिभावः।ननुसापराधेत्रस्मिं ४५
पराधेदृष्टतोमनसःकावाप्रथममेवामतत्यत्तआहहामोविनाविहारिणेति।विहारउ
कंगविनोदःसोस्यास्तीतिमयाविनाउत्कंवितेननिमिषमात्रमपितिष्ठतिवाहयितुम

समर्थेनव्यासंगसंपादनेनहतेनापराद्धमितिभावः।ननुगोपिकालिस्वरसगालह
त्पवाद्यविनोदंविदधानःकथमुक्तंवित्त।कथंतरांनिरपराधः।कथंतमांमनसःप्र
॥अन्यन्मनोहरंकंपमानेहृदयादिमिन्नेष्यागमनंसंभावयन्निकटवर्तिनीश्यामवगत्यसंकेतशय्यांसज्जीकरोतिसमीपेचायपश्यन्॥

CC0. In Public Domain, Digitizagtion by eGangotri

मयाकिंचिद्देवतन्मध्यएवापराद्धंकिंतागतापराद्धन्येतित्वन्मागमिवलोकतश्तिनाव॥
अत्रौत्सुक्यविषादयोःसांकर्यंत्तवउपयानमित्यत्रसर्वनाम्नोग्रहणमात्रेणैववज्ञावश्तिउ
वज्ञाव॥तडुकंवातिरकहडोल्लतमनिसरणमहत्ववदंतातदहस्त्रूपंवशमुपदिशति॥ब
॥हखरमधीरंत्यजमंजीरंरिपुमिवकेलिहुलोलं॥चलसखिकुंजंसतिमिरपुंजंशील
पनीलनिचोलं॥धामखिद्दितापदेशविषयचूतेराधेनिविडांधकाराहततयातिविश्रं
लक्रीडेचितंललाटदृमलिसरंतीचरणोक्षेपनिक्षेपयोर्वाचालतयातंकापादकेत्रधी
रंमुखरंतावस्मरानतिंजतयानादरणीयंकेलिहुलोलंक्रीडायांनिजदेशपरित्यागेन।

गीन्दी ९२

पश्चातथसंचारकारितयावगप्रतिबंधकंरिह्वरिवप्रतिकूलकारितयाशत्रुमिवद्वेष्यं
परिहरतथानीलनिचोलंनीलावगुंठनपटंपिदधानानिजांगकांतिंतिरोधेहीतिला
व॥गमनानंतरंसौलाग्यप्रोत्साहनायाह॥ब॥उरसिमुरारेरुपहितहारेघनइवत
रलबलाके।तडिदिवपीतेरतविपरीतेराजसिसुकृतविपाके॥ध्रु॥रण।पीलेगौरांगि
त्वंनिहितचपलविशाकंविाकमेघेश्यामलिंगनविशषवशोत्पन्नचापलहारसुरणज्ञतसं
निधानेअतिकविनेत्वकुचोत्पीडनस्पृहयाकुनिजवक्षोरंस्थलेरमणीअसंचितपुण्यफ
लायमानवीरायितवशासंजातस्फुरणविघ्नदिवत्राशातिशयंधारयंतीतमानंदयि॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घ्यति श्रोत्तमानेव तस्याः सा वर्तिन्तावः। जघनोपश्लेषकालिंगनावष्टंभं निरूपयंती श्रोत्स
हयति॥८॥ विगलितवसनं परिहृतरसनं घटय जघनमपिधानं। किशलयशयने पं
कजनयने निधिमिव हर्षनिधानं॥ धीरस०॥९॥ गा८॥ आलिंगनवशान्न विगलितनीवीबं
धमावग्गतिरकाच्छुटितकांचीगुणसंभ्रमातिरेकेण इरोन्नारितकलत्रजघने हर्षपरिप्लु
तमतर्कितप्राप्तनिक्षेपमिव किशलयशयने सा कततात्पर्यं पंकजनयने हर्षविस्फारिते गी०टी०
क्षणे खंडरीकां घटयंती प्राप्तजन्मसाफल्यं तं विधेहीतिन्नावः। एवं प्रोत्साहितां राधां ९४
प्रकारांतरेण प्रेरयति॥८॥ हरिरभिमानी रजनिरिदानीमियमपि याति विरामं। कुरु

मम वचनं सत्वररचनं पूरय मधुरिपुकामं॥ धीरस०॥७॥ हरिरिति हे प्रियसखि उक्तलाव
ण्यामनोहरांगस्फुल्लिमानी पूर्वं यत्र समंचयेत्यादिश्लोकोक्तानि निवेशाद्युक्ता अर्थ
पितदीयमत्तिनिवेशं निराकृत्य त्वमानयामि परंतु युगसहस्रायमाणानि मपाद्य मन
पि रजनिः अवसानमिदानीमुपगता सा नोपकर्णयामयि गच्छति अतो मम सदयोक्त
ज्ञादिनालब्धविविधगौरवायाः प्रत्यायितहृक्लायाः वचनं सत्वररचनं कुरु यथा मांउ
त्सं निवदितसंदेशां प्रति पद्यते तथा विधेहि अन्यथानुक्तसंदेशां विलंबितोक्तसंदे
शां वा मामेव मन्येत मधुना च सद्यः पूर्वं स्थितावरमधुना च द्विवियोगात्परं मधुः कांदशामव

Dr. Urmila Sharma Collection, Varanasi

सरस्वतीध्यानेषष्ठीतिं निजानेश्वतिभावः ॥ ब ॥ श्रीजयदेवेनकृतहरिसेवेश्रणतिपरमर
मणीयं। श्रुदितहृदयं हरिमितिसदयं नमतसुकृतकमनीयं ॥ धीरसमी०६॥ ॥११॥ इ
हश्लोकप्रावदितिक्रमेरमणीयं सणतिमतीत्यर्थः। किंविशिष्टं स्पष्टं। एवमभिसरणाय श्री
सादितां राधांशस्यावस्थातिशयप्रतिपादनेन वर्णयति ॥ ब ॥ विकिरतिमुहुःश्वासानाशाः पु
यकुलं मुहुरीक्षते प्रविशतिमुहुःकुंजं गुंजन्मुहुर्बहुताम्यति। रचयतिमुहुःशय्यां
पर्याकुलं मुहुरीक्ष्यते मदनकदनक्लांतः कांत प्रियस्तव वर्तते। हे कांते इह श्लोके कं वा विष
यं प्रातः राधे तव निजान्निष्ठ्यावर्जितं तस्य चित्तायाः स्त्रियाः निरूपणं विषयम

आलाचामांपुरो ४

गी॰टी॰
९५

---

दनकदनक्लांतः विवेकशून्यकंदर्पसंबंधिप्रतिक्षणविलक्षणावस्थातिशयो वर्तते।
इत्यर्थः। कदनं विहणोति। विकिरतीत्यादि। किमद्यापि नायाति किमस्मिन्मुखं गच्छामि
न खलु किंचिदित्यादि तमित्यादि बहुविध चिंताकुलतया वारंवारं श्वासान् मुंचति। त
था किमागतामेव देवक्षु विलसितापहृतसामर्थ्यमिदं दृष्टुं नष्टुं शक्ता तिं तं विचारय
मितावदितिपुनः पुनः नासाग्रविनिहितदृष्टिर्नवति तथा ध्यानप्रायशोवामेतः कुंजगता
विविचिंत्य स्वयमेतः प्रविशति तत्रापि अपश्यन् मुहुर्बहिरिति वारंवारं प्रविशति। तथा
तिकविनरुद्ध्या खलु राधा यदा हशा दशामापन्नमधुनापि मां नागमच्यते श्रतत्पवच

CC0. In Public Domain, Digitizagtion by eGangotri

नारवस्तुतस्याःसखीययावंचितोऽहमित्यादिविविधवचनादागच्छंतीत्थंश्रोष्यसीत्युत्कंठ
ऽप्रकारेणपालनसमानःआत्मनापराधंविचिंतयन्पुनःपुनःक्षाम्यतितथाकोकिल
दिकृतकलमाकर्णतद्वधूद्दागमनसंभ्रममवगत्यसंकेततल्पसज्जांकरोतितृणादल
स्यापिदपदध्वनिमोहितासमाकर्णयतात्येवंपुनःपुनःकरोतितथासमीपमागतानि
श्चित्यविनोदेनविनादेनकश्चिन्निस्तीनामवगत्यनायंविनाप्रावसरइतिसदैन्यंउ
ऊर्ध्वमुखःस्थितोऽक्रतश्चतिष्ठावा।।एवमवस्थायांनिरूपितायामपिविलंबमानांराधांवि
लंबेकारणंजिज्ञासमानासंभावितकारणसाकल्यंनिरूपयति।।बा।।वचाक्येनसमंसम

गी॰टी॰
९६

यमधुनातिग्मांशुरस्तंगतोगोविंदस्यमनोरथेनचसमंप्राप्तंतमःसांद्रतां।।कोकानां
करुणस्वनेनसदृशोदीर्घमदभ्यर्थनातन्मुग्धेविफलंविलंबनमसौरम्योभिसार
क्षणः।।स्वप्रतिपक्षिभूदेराधेयस्मादभिसारसकलकारणसमवधानेविलंबनमफ
लंयद्यभिसारात्पयागिकिंचिदनेनसंपाद्यतेस्यादेवास्यसाफल्यंतानिचसर्वाणि
इदानीमवसंपन्नानितस्मादसौसकलकारणसमवेतोभिसारार्थवोरमणीयःइत्यर्थ
ःसकलकारणसमवधानमुपपादयति।।अद्यक्षोभनति।।ईर्ष्यावशाज्ञततयाआग
तायारुदयस्संभावितमतिदारुणंवाक्यांतनसमंगमनविघ्नकारितयातिक्रूरकमा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सूर्येतिपायेनसमयंप्रेमामस्येनास्तंगतासंजातानुतापयाद्ययादिवस एवातिमहता
यासेनवीतारात्रिर्बहुनिमेषमात्रमप्यतिवाहयितुमशक्येतिनागमनकालाना।
सूर्यास्मरणेनविप्रतीपवचनावकाशोयनप्रत्कश्नरकथनेनापिविलंबवासावले
बास्यादितिभावः॥ एवंगमनप्रतिबंधकयोरभावेनिष्प्रत्यूहसाधकयोःसंपत्तिमाह॥
गोविंदस्येत्यादितमोभिसारिकाणांसुखाहकार्यंचकारंगोविंदस्यवशाज्ञनत्वस्य
कत्वेंद्रियहरत्नेसदस्यमनोरथानाभिलाषपूर्णसमंमांज्ञातार्थमपियत्किंचिदितमात्रमे
वच्छिन्नतयाविभाव्यमानस्नेहनधैर्यविवेकोन्मूलननाशादितमहामोहेनाभिलाषे

गी॰टी॰ ९७

णसमंसांज्ञतामपियत्किंचिदितमात्रमवाशंसनीयंतन्निविष्टतामपिप्राशमिता।
यिकिंमांप्रार्थनीयमितिभावः॥ विपक्षेबाधकमाह॥ कोकानामितिममानवरतबज्ञ
हतवचनायाःप्रार्थनाद्दूरणादपिलघुतापादिकायाश्चाकोकानांरात्रिविरहिणांपक्षि
णांकरुणक्वणनवादीनाव्यक्तशाह्नसहशाखुवयोदृशांविलोक्यसंप्राप्तादैन्यसू
चिकागद्गदिकानिष्कंकेवलतयाव्यक्तशब्दाकिमितोपिदृश्यामिमंदभाग्यातिवेया
कुलव्यंजिकाचेतिभावः॥ एवंविलंबकारणंदृष्ट्वाराधांश्चात्मनोसामर्थ्यंगमनोत्के।
वातिरेकेणप्रकटयंतीकाप्यनागतायाःस्वयमभिसरणंलघुतापादकमितित्रा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कमानामवगत्यउपायकुशला सखी विरहोत्कंठितयोर्निजनिजागारवंसं रहतो
रन्निसरतोः कामिनोस्त्वज्ञातकथानानायायमुपदिशति॥ ब॥ अश्लेषादनुचुंबना
दनुनखोल्लेखादनुस्वांतजप्रोद्बोधादनुसंभ्रमादनुरतारंभादनुप्रीतयोः॥ अन्यो न्यं ग
तयोर्भ्रमान्मिलितयोः संभाषणे जानतोर्दंपत्योरिह कोन कोन तमसि व्रीडाविमिश्रे
रसः॥ आश्लेषा निसारादनुरूपेण निविडतरतमसि अंधकारे अन्यान्यं गतयोर्लीचननि
मीलनकेलिप्रसंगादिना सखीजनेन समं संकेतीकृतप्रदेशं समायं गतयोर्भ्रमा
न्मिलितयोस्तत्क्रीडोचितनिर्जनं निजनिजवयस्याद्वेषणपर्यटनवशेन यदृच्छया गी.टी. ९८

क्वचित्कुंजे संजातांगसंगयोर्दंपत्योर्निभृततरप्रदेशं मिलिततयालब्धविश्रंभयोः
कामिनोः कः को रसः आलिंगनादिविषयाभिलाषो व्रीडाविमिश्रो लज्जासंवलि
तो न तिन अपितु सर्व एव लज्जासंवलित इत्यर्थः कथं सर्वेषामभिलाषाणां ल
ज्जासंवलितत्वमित्यत आह॥ आश्लेषादित्यादि परस्परांगसंगोत्करितपुलका
दित्साध्वसनकिमिदमन्यादृशाश्वस्यापिनिर्वापयत्पंगानितकिमालिंगावो न
खलु किंचिदनुचितेन सखीपरिहासपात्रतां प्राप्स्याव इति सविमर्शमवांगाणां ग
संतापनिर्वापिकालिंगनानंतरमात्मानाद्युत्तप्रार्थना विषयतया निजनिजवि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तमागमनं तैस्तं नाव्यकिंनिलयायसर्वरसातिशायिसुधामाधुरीधुरीणाधरपल्लवमास्वा
दयावः नखलु निर्विषयतया निःफलमनोरथौ स विष्णावशतिचिंताः सर्वसकरुणाज्ञा
माल्लरोपेसंचुबनानंतरे किमयं स्वप्नः किंवा मायाथवान्यं तिरिति विचिंत्य विचारायस
स्वरतरनखाघातसंजातज्ञोनानंतरं कथं सर्वेद्रुवापारघातुरूल्पमतुलवावृ
तिइषोदितदरहासश्वर्वसंलोगाकांक्षानंतरं बहुधासंकल्पसमागमेद्गुएतावत्सौ गी.टी.
नागएमतुस्यापि विफलितमनोरथावावांतन्नयावाहै वादिद्युख्यमापतितितावद्देव ९९
ज्ञतार्थौ नवावश्लिसविस्मयद्विगुणिततत्कालोचितावगानंतरं ज्ञाम धच्यतयानिरा

तिशयानंदसंदोहवशीकारानंतरमंगसंगादिविमर्शेनिरुक्तत्रिविश्वासतयाप्रस्तुतत
त्कालाचितालापैर्निज निजासोनागंप्ययथार्थे निश्चित्य ततोऽकामिनाः पूर्वकालान
न्यां तिज्ञल्पव्यवहारस्मरणेन तज्जातिरकशालितति नावा। एवमन्यापदेशोप
देशेनापि तस्मामवस्थितां राधां संकेतवसतिगमनकौतुकापदेशेन पुनरभिसर
णाय प्रोत्साहयति। बालसलयचकितं विन्यस्यंतीं हरं तिमिरे पथि प्रतितरुमुहुः स्थि
त्वा मंदं पदानि वितन्वतीं। कथमपि रहः प्राप्तामंगैरनंगतरंगिभिः सुमुखि सुभगः प
श्यन्स त्वामुपैतु कृतार्थतां। सुमुखि मानापगमेन तत्प्रसादावदानराधे सत्वदर्थमे

Dr. Urmila Sharma Collection, Varanasi

वैकट्यमानासुनगस्य दादतत्रणपतयात्तेभसौभाग्यपात्रस्तोगाढांधकाराद्दतेमा
र्गस्तिलयचकितनरवलुकापिद्रक्ष्यतीतिसमाश्रसंकथंमरवाह्नितीयिवयामीतिस
विस्मयंचयथास्यात्तथाहशंविविधत्रमस्तुतांहष्टिंत्रस्तावलोकनोक्तंव्याविषयांत
रमप्रक्ततामपिनिम्नोन्नतप्रदेशावलोकनायवलाच्छापयंमीप्रतितस्तुक्तगस्थिवा
स्थिवापदानिवितह्तंकियदूरेकेंचनमद्दारूहमवलोक्यायमेवसंकेतवसतिचि गी॰टी॰
ह्नरूलश्च्यवगत्पातिमद्रागमनेसंजातश्रांतिवाशाननतत्रस्थायंस्थायमवस्थानोदिता १००
स्तच्चतयागमनानुरूलानिपदानिमंदंमंदमश्चनगौरवसंरक्षणिकाविस्तारयंतीक

यमपिरहस्यश्राशांतहर्षनिस्मृतहीयमानकोपोदिताश्रुस्तरपरिमार्जनसांत्ववादस
शापथपादपतनादितक्कालोचितकमपरिरूतवामतयासंकेततल्पप्राशामंगेरा
त्रिंगनचुंबनवदनघ्राणनमल्लापश्रवणादिषट्मिहमिकामुकूलयन्निरवयवैं
रनंगतरंगिलिस्वन्निमिशानुरूतविविधमदनबाधानिवेदनहियोणितत्रुक्ष्मोनागप
वांजकतयाप्रकटितबहुविधालिंगनादिविषयप्रवृदन्निलाषःपरयन्नमकल्लेंद्रियह
शीरकैकेंद्रियहन्नावधमस्यसाशाकुर्वन्निन्नतार्थतांमंप्राप्तसंचितसुचरितपरीपाका
वस्थांसरव्यावक्ष्यमाणमनुसंदधानःस्वर्गातंसूचयति।राधामुग्धेति।राधावदनकम

CC0. In Public Domain, Digitizagtion by eGangotri



त्नमाधुरीलोलुपतया भ्रमरायमाणस्त्रिलोकीशिरोमुकुटेंद्रनीलायमानः ॥ आपन्न
नुकंपया विविधावदानशाली विश्रब्धवल्लवीजनमनोहर्षनिदानतया प्रदोषायमा
णः कंसवधसूचकाद्भुतबालकेलिः चिरं त्वामवतु इति श्रोतारमनुवदरंजयितव्यार्थः ॥ ८
॥ इति श्रीशेषकमलाकरविरचितायां गीतगोविंदव्याख्यायां साहित्यरत्नमालायां
पंचमः सर्गः ॥ ॥ ५ ॥ ॥ अनुसंहितमुपक्षिपति ॥ अथ तां गंतुमशक्तां चिरमनुरक्तां
लतागृहे दृष्ट्वा तच्चरितं गोविंदे मनसिजमंदे सखी प्राह ॥ अथेत्यादि ॥ अथ तां विविधोपायैः प्र
सादनानंतरमपि विलंबमानां राधां गंतुमशक्तामनंगपीडापरिक्षीणावयवतया स्पष्ट

सामर्थ्यरहितां गृहे चिरमनुरक्तां स्वयमुषितनिकुंज एव समागमाभिलाषिणीमव
लोक्य तच्चरितमीदृशमन्मथपीडितास्तु तच्चरतया आश्चर्यजनकमवस्थांतरं कंदर्पेणने
दनायेन मन्मथकृतकार्श्यपीडिमादिशालितया विश्वसनीयराधावदनेन स्वभाग
ध्येनाहेत्यर्थः ॥ उपक्षिप्तं प्रपंचयति ॥ ब ॥ पश्यति दिशि दिशि रहसि भवंतं तदधरम
धुरमधूनि पिबंतं ॥ नाथ हरे सीदति राधा वासगृहे ॥ ध्रु॰ ॥ अनुचितकारिणमपि स्वामिने
नानुपलंभनाय हरे राधामनोहारिन् नाथ हरे एवं मागत्य मया निवेदितां राधावस्थां
माकर्ण्यापि परिखिन्नता विलंबमानतिवा ॥ राधा वासगृहे त्वदागमननिश्चये न वक्रोडे

Dr. Urmila Sharma Collection, Varanasi

चितोन्नतातिमनोहरमंकेतवमतौसीदतिप्रतिज्ञाणविलक्षणावस्थांकृत्वातामपता।
त्यर्थः।नीतिमिवप्रतिपादयति।पश्यतीतितदधरमधुरमधूनिपिबंतंत्वागतेयामव
गत्यनिजाधरयानव्यतिरेकेणक्षणमात्रमपिस्थातुमशक्नुवंतंविचिंत्यात्मानंपरि
हसितुंनिलीयावस्थितंविभावयंतीसर्वास्तुदिक्षुयावंतिरहःस्थलानितेषुतेषुवि
चिनोतीतिभावः॥७॥त्वदभिसरणरभसेनवलंतीपततिपदानिकियंतिचलंती॥र गी॰टी॰
नाथ०॥तथानिश्चेष्टतयापतितापिराधेयाहिंडुह्लोतिकंबुजाद्वेत्यात्मपितावद १०२
भिसरणसंभ्रमणांगीकृतस्वास्थ्यावलंतीताचेष्टमानवमवंति।त्वन्नंतरेज्ञतमखाद

स्थावलंबानिचत्वराणिपदानिगत्वानिःसहापिगमनौत्सुक्यमपरित्यजंत्येवपतति।
विगलितचेतनेवजायतइतिभावः॥८॥विहितविशदबिसकिसलयवलया।जी
वतिपरमिहतवरतिकलया॥३नाथ०॥तथापतितायथाविहिताविरचितावयवतयाविगलि
तधृतविच्छायपट्टणालपल्लवकरकाहास्मिन्भ्रमंगलसंज्ञायापादकेदत्त्वाविशेषे
तवताहरेविरहारंपिहृदयसंनिधमसमसुंचतःरूचिकलयाकथंतमहदृष्टाहृतार्थागपि
ष्यामीतिचद्दर्शनप्रीतिःकलयाकोशलेनपरंजीवतिच्चास्तीतिमरणेनिर्वाणमपिरू
णद्धीतिभावः॥८॥मुहुरवलोकितमंडनलीलामधुरिपुरहमितिभावनशीला॥४

CC0. In Public Domain, Digitizagtion by eGangotri

नाथ०।तथाकिंवदामितस्याउज्वलांततांयच्छयासहृत्तनुनेदमप्यसहमानाअनवरत
ध्यानेनाशद्यन्मयद्वात्वदागमनसंभावनयासखीजनसंपादितच्छदर्थमंडनमोज्ज
ग्यकथंतयाविनाधारयामीतिहडकुच्छकुरवलोकतइतिनावः॥७॥इतिमुपेतिनक
थमभिसारादहरिरितिवदतिसखीमनुवाराधनाथ०।तथाउवरिदिव्यापाराननुसंहितने
दासखिकेनहेतुनाहरिरभिसारंरचयतिनोपैतीतिखनःपुनरुन्मत्तेवोन्नरमनावलयितो
वदतीत्यर्थः॥८॥श्लिष्यतिचुंबतिजलधरकल्पंहरिरुपगतइतितिमिरमनल्पं॥नाथ
हरे०।तथासमागतएवायमितिसखीसमाश्वासवचनेयथार्थमध्यवसंतीसजल

गी०टी० १०३

जलदपटलसेनिनिभंगाढांधकारमदंगसंतापनिर्वापिकोमांबकुंठच्छमसंकेतवस
तिमागताश्लिक्षइतिकदाचिदालिंगतिकदाचिच्चुंबतीत्यर्थः॥८॥लवतिविलेविनि
विगलितलज्जा।विलपतिरोदितिवासकसज्जा॥९॥नाथ०।तथादेवादविलसितलल
ज्जप्रबोधात्वयिविलंबमानेविगलितलज्जाविलपतिहतेएतेममलोचनेयास्यांलाव
लोक्यतेतदवदनारविंदंगंधोयमधरोयस्यचुंबनसंभ्रमंनावलंबतेनिष्फलेचेदेकुचमं
डलेयत्तदालिंगनोत्पीडनेनप्राप्नोतीत्यादिसादेन्यंवदतीतितथाप्रहाशागताकथमुपे
क्षितास्वाहंमंदभाग्याहाकथमदृष्टैवतंविपद्येनिरवलंबनेमहाउमावसंकथामुको

Dr. Urmila Sharma Collection, Varanasi

वाकदाचित्संस्मरणायोयेजनइत्यादिपरिहार्व्यंतीसाहमस्यकालीनविरचितवेषा
उकेंगेरादितीत्यर्थः॥७॥श्रीजयदेवकवेरिदमुदितंरसिकजनंतनुतामतिमुदितं॥८
नाथ॥ ॥१४॥स्पष्टं॥नकेवलमात्मावस्थायेवतुरवस्थाराधाकिंतुचचिंतयापीत्या
ह॥७॥विपुलपुलकपालिस्फीतसीत्कारमंतर्जनितजडिमकाकुव्याकुलंव्याहरंता
तवकितववि‍धायेमंदकंदर्पचिंतारसजलधिनिमग्नाध्यानलग्नाहृगास्ते॥एकितवव गी॰टी॰ १०४
णयप्रसरसरलहृदयराधावंचनचातुरीसुलंगमच्यसोऽहमस्ताच्चविदिततत्वकेत
वाहगास्तेस्वयाजमनोहराराधातवाविदितविरहव्यथाहन्नांतस्यामंदकंदर्पचिंतास्व

लुनाविकस्याह्निकोऽप्यनन्तचूतवरप्रतिक्षणविलक्षणमन्मथव्यथागोचरामतिह
रुणारवव्यइयस्याश्चाततादृशंसकललोकालोकचूतंशरीरंक्षीयतेकिंकरोमिङ्ग
तपापाकथमाश्वासयामिमदर्थाउत्तमन्मथकदर्थनंनखलुअहमिवेहशंवि
लसमहमवनूधारयिष्यतिमहालागाजाविलमित्याद्यनेकप्रकारानवरताविच्छि
न्नांचिंतांविधायध्यानलग्नावक्षणायत्वदाहितसकलेंद्रियवृत्तिःरसजलधिनि
मग्नाऽभिलाषसमुद्रमग्नेवामवगत्यो[illegible]मिवातितरांमम्नेतिभावः॥एतदेवसंदे
हुकेउपपादयति॥विहितेति॥भावनयामदनबाधामनुनवेतनवेतविनाव्यवेपम

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नाधुलकजालकांचिततनुःसमुद्दितवेदनयास्फीतसाकारागद्गदिकानिरुद्धकंठत
यांतरुदितस्यायतयोकेअतिषेधसूचकंसमाकुलंचयथास्यात्तथासामाद्दृसिकमा
मेवंकिमकांडएवमध्यवस्यसीत्यादिविक्लवाक्षराण्युच्चारयंतीचेतनाचेतनमाधार
ण्येनसर्वनाकुलयतीतिभावः॥ एवंभावदर्शनंतंसंभाव्यद्रुतागमनंनिश्चिनोती
त्याह॥ बा॥ अंगेषाभरणंकरोतिबहुशःपत्रेपिसंचारिणिप्राप्तंत्वांपरिशंकतेवि गी॰टी॰ १०५
तनुतेशय्यांचिरंध्यायति। इत्याकल्पविकल्पतल्परचनासंकल्पलीलाशतव्या
सक्तापिविनात्वयावरतनुर्नैषानिशांनेष्यति। एषाविरविरहोत्कंठितावरतनुला

वण्यमात्रसाराराधा अनेनप्रकारेणनेपथ्यद्रुतागमनसंभावनाशयनीयविर
चनवितर्कबहुहेतुविचारस्वरूपानेकसुरतव्यापारव्यासक्तापित्वयाविनाऽत्रतद्रूप्र
णयालिंगनविनानिशांविनयंतीकंकंकांकांदशांप्रापयिष्यतीतिभावः॥ व्यासंगमे
वप्रकारंनिरूपयति॥ अंगेष्विति॥ किंवदामिसख्यादिपदर्शनाद्श्रवाणपिशुस्समीप
गमनसंक्रामणेकमेववक्तव्यादिकरचरणादिषुपूर्ववद्भूषारितत्रसंनिवेशाय
यातथास्मरणद्रुतंतवनिर्वापादकंबिंबलीनियोऽज्ञैःकैरनापर्यवसितमेंडने
वपत्रेपिमंदमारुतवशानकिंचिच्चलितत्वामेवसमीपमागतंमन्यतेतथामन्यमा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नाशयन्तीयं रचयन्तीत्वद्गाममनहर्षनिर्भरमानसा स्तवतितथा जायमाना
त्वामपश्यन्ती निमीलितनयना कथमत्रागतो निलायमानस्थितः किंवा मया विप
र्यस्तमिति विनम्रवदना चिंतयती तिष्ठति ॥ एवं सख्या राधा हृष्टा तत्सखाय निवेदितं नि
हृष्य तस्मात् दर्शनद्विगुणितविरहवेदना राधा उन्नतप्रलापमत्तमंदधना स्तगीतं सू
चयति ॥ ८ ॥ किं विश्राम्यसि तत्स्मरो गिरिवने लांडीरद्रुमारूढि त्रातया मिनदृष्टिमि गी·टी·
गोचरमितः सानंदनंदास्पदे राधायावच्चनेन तदृश गच्छ ख्यातानंदांतिके गोपतो गोविंद १०६
स्य जयंति सायमतिथि प्राशस्त्य गर्भागिरः ॥ तत्रास्मिप्रायं राधावचनं पांथवचना

नंदसमीपे गोपतो वचः श्रवणसमनंतरसमुदितमंदहसितादिवशेन गोपायि
तुमशक्यस्यापि गोपनं न दत्तो गोविंदस्य सकलेन्द्रियहर्ष्यावलोकितया व्यामोहका
रिणः तस्य सायमतिथिं प्राशस्त्यगर्भाः सायंकालीनावश्योपचरणीयातिथित्व
शंसासूचिका गिरा वा च उत्कर्षेण वर्तंते इत्यर्थः ॥ किंतत् राधावचन इत्यत आह ॥ कि
मिति ॥ भ्रातः सोदर तस्मात् गिरिवने लक्ष्मसर्पदेशमावाम लांडीरद्रुमारूढि वटद्रु
विशेषे किं विश्राम्यसि तेदं विश्रांतिस्थलमुचितमितो दृष्टिगोचरं ननु इति इदं सानंद
नंदास्पदं नित्योत्सवयुक्ततया सकलविश्रांतिनिदानं नंदगोपालयं नयासि किं या

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यर्थः॥कृष्णसंकेतावासेविश्रांतिस्थवनकुंजात्आनंदरूपकृष्णाधिष्ठिततयानंदस्थ
ह्मेवयाहीतिराधांप्रत्युक्तिप्रायमज्ञानानाकर्ण्यनपांथोयथास्तुतेनदृष्टहमागच्छ
तदेतिकृष्णस्समक्षंनिवेदितवान्सचतदभिप्रायंविदित्वातिष्ठपचारोक्तिभिस्तुगो
पतिस्तात्॥६॥इतिश्रीशेषकमलाकरविरचितायांसाहित्यरत्नमालायांगीतगोविं
दव्याख्यायांषष्ठःसर्गः॥ ॥६॥ ॥अथसंहिताप्रयोगिचंद्रोदयमुपक्षिपति॥अंत गी॰टी॰
रेचकुलटाकुलवर्त्मपातसंजातपातकइवस्फुटलांछनश्रीः॥वृंदावनांतरमदीप २०७
यदंशुदीपैर्दिक्सुंदरीवदनचंदनबिंदुरिंदुः॥सख्याःकृष्णसमीपगमनानंतरंनिज

विरहातुरराधावस्थाश्रवणेच्छितोणितोकेंवेत्सलसखीयावदानयतितदंत्यंतरेत्रि
मारिकाजनमार्गनिरोधेदितदोषइवाभिव्यक्तकलंकःप्राचीरमणीमुखवर्तुलितचंद
नबिंदुरिवहृश्यमानःकरप्रदीपैर्वृंदावनमध्यंविरहिणांसंतापायप्राकाशयय
दित्यर्थः॥अलसंहितंप्रपंचयति॥प्रसरतिशशधरबिंबविहितविलंबेचमाधवेवि
धुरा॥विरचितविविधविलापंसापरितापंचकाराचैः॥शशधरबिंबकल्पेकितत
यापरव्यसनसंजातप्रसादेवंक्रमात्प्रसरतिदीनराधावदनदर्शनादितईर्ष्येणवा
प्रतिहतसंचारिणिमाधवसंज्ञाविलाप्यसंगिनिशेषेनसविलंबेऽपिनिजमौनात्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ग्यातिशून्मितानिदानराधाप्रणयनिर्भरव्यापारदिदृक्षयागत्यकचिन्तिलीनावस्थानेच
क्तुद्धिष्टृर्वज्ञतविलंबेचस्मतिविधुराङ्गस्यागमनादिनिराश्रपसंजातविकल्पमातितिनिर्ति
रसषष्ठलस्यागमनप्रतिक्षिणीराधाउत्कंठितसुकिकेवंविरचितविविधविलापंज्ञतवक्ष्यमाणे
त्मोपालंभनादिरूपानेकप्रकारपरिदेवनेयथास्यात्तथापरितापंपरितास्तामस्येनतप
तयेनहृष्टवस्त्रश्रोतास्ताहशंविशिष्यदुर्वचंस्वयमप्येतावत्पर्यंतमननुभूतचरंविषा गी॰टी॰
दंचकारतत्र्थी।विलापप्रकारमाह॥ब॥कथितसमयेपिहरिरहहनययौवनाममम २०८
विफलमिदममलरूपमपियौवनं॥यामिहेकमिहशरणंसखीवचनवंचिता॥क॥

इतिदुःखिततयासर्वेषामपिलातांबान्त्राह्देवादीनांसंबोधनायद्देश्यकपक्र
ष्यातषामपिनिजदुर्वारदेवदुर्विलसिततत्ताहशादशाविचाराक्षमतयाकिंतेकु
र्युरितिसूचनायविशिष्यासंबोधनंहेमयिदयालवादेवादयस्तस्मिन्नवसंत
रेकंशरणंरक्षितारंयामियासांसखीनांवचनविश्वासेनदुस्तरप्रार्थनानुभूत
कदर्थनानुभूतातासामेकमध्येप्राप्तानांवचनेनार्थशून्यविविधलातज्जावानुबं
धप्रकाशनापदेशेनवंचितात्वघुतांनीतति नास्यवलंबनप्रतिकूलात्मीयाइ
तिलावा।कथंवंचितेत्यतआह।कथितेति।किंवदामिदुःखितांमांविचार्यस्थितो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नागत इति अपि तु मया सखीप्रेषणादिना उक्तेऽपि समये मन्मनोपहरणनिपुणो
हरिरिदं स्त्रीवनमितरगोपसंचाररहिततया प्रतिबंधरहितमहदुद्यानं प्रयेयो । अत्र
स्पर्शनमात्रमपि दुर्गसंस्पृश्यायमानं न गतवान् । अतः इयतमनेहसं तदनिमतत
या निर्मलित्वावर्णपद्मन्यायेन संभावितं मम तारुण्यं प्रहाय्यमित्यर्थः । सखीप्रेषणादि
ना प्रारब्धसमागमाख्यस्य कार्यस्य अनिर्वाहात् दुदितेन विषादेन ह्रद्यापज्जननादेनो
ज्जितया परपर्यायादेन्यध्वनिः । न केवलं मात्रं वा सांदपदेशानं वंचिता किं तु प्रथमतो
ऽपि तन्निरवापादितोयमनर्थ इत्याह ॥ ७ ॥ यदनुगमनाय निशि गहनमपि शीलि गी॰टी॰ १०९

नमनदृश्यमिदमसमशरकीर्तितं ॥ यामि हे ॥ दूरा खलु हेसख्यो दूरा संदेह्य
मविश्वसनीयो बहुवल्लभत्वाय मितिमयोदारिते ब्रजसमागमाकांक्षया धुरतो नि
केजे प्रतिपालयति तत्कथ्यपाकावावंचक इत्यादिसखीनाम् कृत वचनैर्यस्यानु
सरणाय रात्रौ गाढांधकाराहुलायां झिल्लीझंकारादिभीषणं वनं किं वदामि प्राप्त
तामिति अपि तु तदसत्तिरवस्थलाबाहुल्य एव मनुस्मृतेन तेन मम सख्यपदेशाव
शावर्णितयास्खलीति दृढायाइदमसंभावितमनोरथकारितायाप्रसिद्धं हृदयं तदं
वनाविधेयं मनो ॥ समशरकीर्तितं कारणवामनकामनकीर्तनं कारितमित्यर्थः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंसखीषुदोषमारोप्यातिनिर्विण्णाह॥८॥ममंमरणमेववरमितिवितथकेतना
।किमिहविषहामिविरहानलमचेतनायामिहे॰।अचेतनाइवेत्तिरविचारधुरा।
श्यंकरस्यविरहानलसंतापकारिणंविरहंकिंविषहामिकिमर्थंकल्पितत्येपवि
वनेनात्मानंकदर्थयामीत्यर्थः॥कथंवेदयथामित्यतआह॥इतीति॥अनेनोक्तप्र गी०टी०
कारेणव्यर्थितोपमंत्रणतयानिराशपादितिनावा॥नतुतथाप्युत्तरत्रोपायविचार ११०
यसमोऽवगम्यादित्यतआह॥ममेति॥हतप्रणयसंगतयालज्जितजीवन्याममम
वंचकसखीजनपादपतनाद्दिन्याद्यपेक्षयामरणमेवश्रेष्ठमित्यर्थः॥नकेवलंमंत्र

नागतइत्येवकिंचन्यासक्तोपीत्याह॥९॥मामदहदविधुरयतिमधुरमधुयामि
नीकापिहरिमधुत्तवतिहतसुकृतकामिनी॥यामिहे॰।मधुराविविधसंभोगो।
चित्यसंतावनयास्पृहणीयाबहुविधेन्मादहेतुवसंतसंबंधिनीनातिदीर्घा
रात्रिरहहनिःकारणंनिरवधिमांनिजदौर्जन्यप्रपरातांविधुरयतिविकलांकरो
तितथाकापिविरहदुःखाद्यजानानाहतसुकृतकामिनीपूर्वसंचितसुकृतप्रासे
तत्राविमनोरथफलस्वाविहारिंनिजचित्तानुरंजनचतुरंहलक्षमनुभवतिस्ववशं
कुर्वतीरमतइतिनावा॥एवंतस्यासक्तिंजानानाप्यहमतिचापलेनहतवतीत्या।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

टी॥ व॥ अहहकलयामिवलयादिमणिभूषणं। हरिविरहदहनवहनेनबहुदूष
णं॥ यामिहे॰। निश्चिततदागमानवेदंखलुवलयंतेनपूर्वंस्वयामवमकारधारि
तंअथपंचशरस्येनतस्मिन्नवसरविनिर्मितइत्यादिसखीस्मारणपूर्वंधृतंतस्याऽलं
कारिमिंडनमद्यापिधरयामहहनिर्लज्जेत्यद्यहेत्यादिनोक्तकथंनिर्लज्जितेत्या
शंक्यविरहिण्याभूषणत्यागादिदूषणान्येवोचितानिनमणिभूषणानिनितरांबहु॥
नायिकावह्नात्तनविरहिण्यानितमांमविश्वसनीयवंचनाचतुरंहरिविरहिण्या
इतिस्वकेनहरिविरहेत्याननपरिसृतं॥ व॥ कुसुमसुकुमारतनुमतनुशरली॥ गी॰टी॰ ११२

लया॥ स्रगपिहृदिहंतिमामतिविषमशीलया॥ यामिहे॰। सहजमर्थादेवकारितब
त्तवशरावसरप्रतीतिकुसुमविराधिनिजशरीरंजानानयापितदागमनेनिश्चि
त्यानायबरुद्दिममस्थानमंदव्याधृतास्रक्सावांतरप्रविष्टसर्वमर्मनिर्भेदनरूपेतर
बाणविलक्षणस्वभावयातीव्रतरविशरणकारिकिंवदामीत्यादि॥ व॥ अहमिहइ
निवसामिनविगणितवनवेतसा। स्मरतिमधुसूदनोमामपिनचेतसा॥ यामिहे॰। नि
श्चिततदागमनाहंअप्रलुप्तबुद्धितदवनिमात्रातिनाषणक्रूरतरशापणिनिवासवनवे
तसाइहसंकेतवसतिनिकुंजेनिःशंकमुत्तरावधिस्थ्येतिजानामीत्यहमित्यादिनोक्ते

Dr. Urmila Sharma Collection, Varanasi

ननुयावन्नदागमनमवस्थानेकोदोषइत्याशंक्यकविनरूदयान्तस्तोनायातिनसं
दिशतीतिकिंवदामिश्रवयस्यनिशाचातुरीधुरीणेनमनसामसंबंधिस्मरणेवन
द्रियतइतिकिंवदामिश्रपितुमामेवनाद्रियतइतिसूचकेनस्मरतीत्यादिनापरिह
ते।।७।।हरिचरणशरणजयदेवकविभारतीवसतुहृदियुवतिरिवकोमलकलाव
ती।।८।।।।१४।।अस्यष्टार्थो।।एवंहस्यागमनेनात्मानमुपालभ्येदानीतदनागमनहे गी॰टी॰
तूनुत्प्रेक्षते।।७।।तत्किंकामपिकामिनीमभिसृतः।।किंवाकलाकेलिभिर्बद्धोबंधुभिरं ११२
धकारिणिवनोपांतेकिमुभ्राम्यति।।कांतः।।क्लांतमनामनागपिपथिप्रस्थातुमेवाक्षमः

संकेतीकृतमंजुवंजुललताकुंजेपियन्नागतः।।१।।कांतःकामिनीजनाभिलाष
पूरणनिपुणः।।कृष्णः।।किंवदामिव्याजसंपादनेनममगृहंनागतइतिसंकेतीकृत
मंजुवंजुललताकुंजेपिरामणीयकातिशयातिविविक्ततमाभिनवसंकेतवसतित
याविरचितमनोहारिणिनिविडतरलताद्यातकुंजपियस्मादनागतस्तस्मादभिनव
प्रेमाबंधबंधुराबहुदिवसोपचीयमाननिजसमागममनोरथातिप्रौढांतःकरणी
लक्ष्यावकाशतयाभिसृतवानित्यादितत्किमित्यादिनोक्तेनखलुवल्लवीष्वन्नेनाः
संस्तुताकाचनविद्यतइतितत्रापरिहृष्यंतीनावबंधनसावधानाभिर्गोपीभिस्तत्र।

CC0. In Public Domain, Digitizagtion by eGangotri

साधनाकोशात्तत्कृत्वकैर्निरुद्धो दाक्षिण्यपवर्गो प्राज्ञ इति प्रकारांतरेण किं वत्स्यादिना सं
त्वाव्यसखि विरहोत्कंठितस्य मदीयां दशां विनावयतो नायं दाक्षिण्यावसर इति अत्रा
प्रकृपरिशुष्यंतानयनपिधानसावधाननिविडतरांधकाराहृते नीरंध्रतरुतयाऽन्वाय
मानमार्गविपिनसमीपे मामन्विष्यन् खिन्नो हीनः पर्यटतीति द्विनः प्रकारांतरेणार्थ
कारिणीत्यादिना संत्वाव्य प्रेषिता खलु निपुणतरां ज्ञातमार्गा नितान्तानाहूता सा तमाने
ष्यतीत्यत्रापि परिशुष्यंती निवेदितं खलु प्रथममागताया प्रियसख्यायदद्यं तद्दाण
तामापन्नांच्या निःशङ्कैकसारो वज्रीत इति तत्पदात्पदं दातुं मम सामर्थ्यं किंतु इतरं पंथा

गी॰टी॰ ११३

थानं कथमतिवाहयिष्यति सुकुंचेतत् पश्यामि यदत्यं तदारुणा हृदयात् हेका हृष्टौ द
शां प्रपन्ना विशाषाताम्रनाचं शोदयेन तत्तथाविधसौक्कमात्येकसारस्य सकलत्तलोका
लेकारज्ञः तस्य कावादशा सविन्नातिक्रांतमनाइत्यनेन संत्वाविते। एवं प्रणयोश्शंगत
यास्वक्षानागमनेनातिव्याकुलतायाराधायाअवस्थां निरूप्य प्रेष्यातिरकोऽन्यं वै निरूप
यितुमुपक्रमते ॥ब॥ अथागतां माधवमंतरेण सखीमियं वीक्ष्य विषादमूकां। विशंक
मानारमितं कयापि जनार्दनं दृष्टवदेतदाह। राधायां तदनंतरं आगतां शंक
चिन्निता न तयावस्थाप्यत आगमन विषयविरचितव्यापारां सखीं दृष्ट्वा तूष्णीं तत्सकल

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यापारंविषादसूकांसख्यागमनाच्छादनार्थंकल्पितविप्रादालंबितवाग्निरोधांम
धवमेतारणसकलकामिनीसौभाग्यदेवताप्रियतयातिस्पृहणीयंजलक्षंविनेयंवाह्य
तदनागमनसंभावनाश्रुतबहुविप्रलापाराधावदनाविलरूपांशुसरादिविशेषदर्शन
हर्दमवलोक्यसखीजनविविधावस्थापादकपदीयत्तयातिप्रसिद्धंलक्ष्मकयापिनिजप्रौ
ढिगर्वेणानालोचिततत्संकेततयारमितेसंभोगंकेलिवशात्तंविशंकमानासंभाव
यंतीहृष्टवदुपपन्नमिवितवक्ष्यमाणमाहवदतिस्मेत्यर्थः। पूर्वंयद्यंतरोद्भावनेननिरा
स्तमपिपदंसख्यावदनाविलरूपादिनामन्यथासंभवंमन्यमानाप्रथमंपद्ममिवोपपन्न

गी॰टी॰
२२४

श्चेनटहीतवतीतिभावः।। किंतदित्यतआह।।८।। स्मरसमरोचितविरचितवेषाद
लितकुसुमदरविलुलितकेशा।। कापिमधुरिपुणा।। विलसतियुवतिरधिकगुण
।कापिस्तंप्राक्संचितसुचरितपरीपाकाद्युवतिः विविधोन्मादहेतुतारुण्यधन्यातस
णाअधिकगुणाकामशास्त्रोदितरतिप्रौढिकलाकौशलगर्वशालिनीमधुरिपु
णाविकटबंधप्रबंधरतारोपपदीयसाविलसतिइच्छारतमनुभवंतीशोभतइत्यर्थ
ःरतिप्रौढिसुरूषायितेनोपपादयतिस्मरेत्यादिना। दलितकुसुमेत्यत्रवक्षाहि
ःदरविदलितेत्यत्रकर्मधारयः पुनःपदद्वयस्यवक्षआदिःकंदर्पविमर्दोचिते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुरुमणिरणपरिहारहिमांशुसंपादितवदनांबुजपरिमार्जनघनसारखंड
लांगरागादितत्कालोचितधृतावेषात्तथा दृढबंधनग्रथनकालनाययातथस
त्वरकेशसंयमनहृदितप्रसाधनाकुसुमाचेत्यर्थः॥८॥ हरिपरिरंभणवलितवि
कारा। कुचकलशोपरितरलितहारा। कापि। हरिरंजितगाढालिंगनसमुद्रिक्तमदि
रालसतानंदसामादसांतदापरपर्यायमदजनितहृष्टिस्मेरताजुखरागवचःस्खल गी॰टी॰
नेत्यादिसहृदयहृदयहारिव्यापारश्रुतंमविहीनणिदोर्वल्लिनियंत्रणेपुनःपुनःक २२५
पोलाधरचुंबनेविययोदिततत्कालोचितवियात्पत्तत्पश्चुक्ता हृदयप्रदेशालसाविक

शाप्रमाणातिगश्वासकंपमानतादाधिकसंभ्रमवशसंजातोद्गंघनष्टंगारस्त
हृल्स्विनकुंसाघातस्तयातायातहारमनोहराचेत्यर्थः॥सर्वपिष्ठात्पदमितिगो
नदीयमानप्रयोगादव्याप्यनषष्ठीसमासः॥८॥ विचलदलककलिताननचंद्र
।तदधरपानरभसकृततंद्रा।कापि।संभ्रमातिरेकसंजातशिरोविधूननवशाच्चक
लितकतमोग्रस्तकदाचित्परिहृश्यमानशस्त्वाह्लादकारिवदनेंदुबिंबातस्मये
चितांतरास्तत्तस्याधरारसोस्वादनतात्पर्यविस्मृतेतरकरणायतावैजकसंजात
नयननिमालितास्वचितालसताचेत्यर्थः॥८॥ चंचलकुंडलललितकपोला।पु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वरितरसनजघनगतिलोला। कापिं०तद्धरपानखण्डितप्रवणरुक्सा हस्तचकत्स
तांडतांडवकुंडलानवरतताडितकपोला। निरंतरकिंकिणीकलकलशालिम
खलाकलापरंजितनितंबबिंबसंभ्रमविलोलगात्रलतिका चेत्यर्थः॥ बा। दयित
विलोकितलज्जितहसिता। बकुनिधकूजितरतिरसरमिता। कापिं०लज्जितेति
तारकादिवादितच्छत्पयांतस्पनावनिष्ठांतहसितेस्येत्पाननवकुञ्जीद्धिः। ततोवि
लोकितेत्पनेनस्रतीयासमासान्छहश्च रावेयात्पातिरकदर्शनादितहर्षविस्म
यलज्जावलोकनेनकथमयंमदीयांप्रौढिं विदितवानितिसमुदितलज्जाप्रुतहर्ष

गी०टी०
२२६

वशेन संकोचविस्फारणव्याकुलावलोकनोत्पीडनापकर्षानुसरणोदिततस्र
मायाचितविविधावस्थास्पचककोकिलकुलरवरूजितानुकारिमणितसूचित
रतान्तिनिवशसंजातानंदसंदोहा चेत्यर्थः॥ विपुलपुलकपृथुवेपथुभंगा श्वसि
तनिमीलितविकसदनंगा। कापिं०तकालोचितविकस्वरस्मरादापवशसंजाता
तिबकुलपुलकप्रमाणातिरागतरंगितकंपव्यंजितरतिसाध्वसानां तदनंतरसंज
प्रमानश्वासस्संततिव्यंजितनितांतताांतिसंजनितकुंडलताडवमंडिमकिंचिद्धुदं
चद्कारावाराषवचनक्रमं प्रकटितविहंसमाणमन्मथारोपमंदनावा चेत्यर्थः॥ब

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रमजलकणस्तरसुलगाशरीरापरिपतितोरसि रतिरणधीरा॥ का पिंगक्रमोदित
स्थूलस्थूलतरस्थूलतमविकटरतिश्रांतिघर्मबिंदुसंदोहविविधासोलागपुलकाण
यगोत्रलेतिकाचकेदिताङ्गरतिप्रौढिपाटवादितनिःसहताविस्मृतनिजांगानु
संधानतयाशस्रोरसि पतिता॥ वह्यार्थः॥८॥ श्रीजयदेवभणितरतिवंचितखण्डितयु
ऊगातिसुखंजनयतिकमनीयं॥ का पि॥ स्पष्टं॥ एवं सखी विषादमूकां वनतं किंक
मपिकामिनीत्यानानाप्रलिपंपदमुपपाद्यदानीं किंवेत्यनेनसूचितेअपरितोषेऽ
नुसंदधानासखी विषादमूकत्वमाचतत्पक्षेप्फपपत्तिमुत्तरयोश्चाक्तुपपत्तिमन्य

गी-टी.
१२७

मानाहितीयेपदमुपपादयितुंचेदद्यस्याश्वासहेतुत्वेसंभाव्यनिराकरोतिब
॥ विरहपांडुमुरारिमुखांबुजद्युतिरयंतिरयन्नपिवदनां॥ विधुरतीवतनोति
मनोभुवःसुहृदयेहृदयेमदनव्यथां॥१॥ अपिसंभावनायांसंभावनाचबाकुल्ये
नयद्यर्थापद्दर्शिताअयेइतिसखीसंबोधनायापक्रम्यकिमर्थमितामदर्थाउ
क्तविविधयासामनेनविषादवचनेनायासयासिकिंवाकरोषीयंहरिणेपाये
त्यत्रिआयणविशिष्यासंबोधनंतस्माःपद्यपंचेशेमविरहसंजनितपांडिमस्पष्ट
वदनकांतिःस्यात्विरहव्यथामाछादयन्संभाव्यतत्रयेतुमेन्मयस्पदस्मेकुना

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यिका वदने किंचित्करस्यानन्यगतित्वाज्जनेस्य रस्य मित्रतया तदनु विधायी मम
हृदयेशस्य विरहाग्नुकूलं संपादनसंलावना द्विगुणिता मम मोहप्रकारिकंदर्पानु
मतां वदनो विस्तारयन् मदायानां तावदेषां अपि विषादं करोतीति लावः ॥ उपपाद
यति ॥ ब ॥ समुदितमदने रमणीवदने चुंबनवलिताधरा सुरागमदतिलकं लिखति
सहुलकं मृगमिव रजनीकरे ॥ १ ॥ रमते यमुनापुलिनवने ॥ विजयी मुरारिरधुना ॥ मु
रारिः प्रसिद्धसुरासुरनिर्यातिनाप्यसाधिता खोयकीर्तिः सोऽधुना विजयी अन
न्यगतिविलक्षणसुगंधस्त्रीजनविश्वासघातसंपादितविजयः यमुनापुलिने स्मरण

गी॰टी॰
११८

यथा नहि मम्ब्रथमदर्शनादि खेदराहित्यरिकालिंदीतीरवने वा ज्ञाकिसंनीयोग्यसवित्रंने
तरविहारनिरोधकमन्मथागमदुःखदायकवक्रकुंजपुते हृंदावने रमते निरातंको वि
हरतीत्यर्थः ॥ कथं रमत इत्यत आह ॥ समुदितेति ॥ करस्य वा संजातमदनो बोधव्यंजक
दरहसितस्तत्प्रसादविशेषशोभितसमयोचितचिबुकोन्नमनवशासंजाता धररस
लनस्पृष्टितचुंबनानिलापेतत्कालीनसहृदयहृदयहारिव्यापारचतुराया युवते बंकु
विधवक्रोक्तिं गात्तरंगिते सुखेकस्फूरीतमालपत्रतद्वदनं संस्पर्शमिषु दितरोमांचं य
थाम्या त्वया चंद्रविंबमृगमिव रचयतीत्यर्थः ॥ ब ॥ घनचयरुचिरे रचयति चिकुरे तर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ललिततरुणानने।कुरुबककुसुमेचपलासुषमंरतिपतिमृगकानने।रमते॰ङ्गल
कर्ईकप्रसाधनसौभाग्यंस्वमात्रनिष्ठंकथमधुनानन्यगामिसंपन्नंजिज्ञेतिजिज्ञा
तथावदिष्ठमितिस्वरचनायकस्याश्चिदित्युक्तिःउत्तरत्राप्येवंवेदितव्यमितिनाव।
कस्याश्चिज्जलदपटलकमनीयेसुवदनवदनविस्मयोदितमंदस्मितादिचापलका
रिणिनिजसहचरीसुततयासुलगकंदर्पकूपश्टगसुखवसतिवनेविशिष्यसमीक्ष
तेकेशपाशेश्यामलितगगनानिलाषपूचकेतडित्कांतिशोणमैरेयककुसुमरचनाविशे
षंपूर्वामकैकेरतिकालीनकेशग्रहसंज्ञासूचयन्ग्रथ्नातीत्यर्थः।।७।।घटयतिसुघ

गी॰टी॰
११९

निकुचयुगगगनेमृगमदरुचिरुषिते।मणिसरममलंतारकपटलंनखपदशशिभू
षिते।।तथाकस्याश्चित्पीनेतिशयितमहत्वाश्रयतयागगनरूपेकस्तूरिकानुलिप्त
तथाश्यामलेननखलांछनरूपचंद्रकलाविराजितेस्तनमंडलेनक्षत्रपंक्तिरूपंनि
र्मलमुक्तामणिहारंश्रुतिस्निग्धतयायथास्थापितमतिश्लिष्टंमिवकुचस्पर्शलालसेन
हठतरंसंश्लेषयंतीत्यर्थः।।८।।जितबिसशकलेमृदुभुजयुगलेकरतलनलिनीद
लेमरकतवलयेमधुकरनिचयंवितरतिहिमशीतले।रमते॰तथाघनसाररचना
शीतलेनिजकरस्पर्शप्रपंचितरोमांचतयामृणालखंडजेतरिलावाभिव्यंजनार्थं

Dr. Urmila Sharma Collection, Varanasi

तनखदत्तास्तइनसंजातचापलेकस्याश्चित्तुजस्थगलेपयिनापत्रेत्तुंगस्तघमिव
मामप्यालिंगनदानेशीतलतयेलिन्त्रात्मानमिवमरकतवलयद्दकोत्वंप्रयच्छती।
तिलावा।।अनेनचनिजविरहसंतप्तमात्मानमप्यशीतलोपचारायमितिसख्याउपा
लंभोप्यंलगति।।६।।रतिगृहजघने विपुलापघनेमनसिजकनकासने।मणिमय
रशनातोरणहंसनविकिरतिकृतवासने।रमते०तथाशृंगाराधिदेवतायारतेनि
वासभूतेविस्तृतेकटितटेश्रुतिसुभगेकामराजपीठेचंदनचर्चितेचंदनमालिका
सदृशंमणिमयमेखलाकलापतस्तोलाम्यसंदर्शनिम्यशनिपरवशाशा।।भ्रमसंघट्ट

गी·टी·
१२०

यन्तुविद्धिशिचिन्ततयाविकिरतित्र्यथातथंविन्यस्यतीत्यर्थः।।७।।चरणकिसल
येकमलानिलयेनखमणिगणपूजिते।बहिरपवरणंयावकभरणंजनयतिहृ
दियोजिते।रमते०तथासकलनिजसौभाग्यनिदानभूतायाःलक्ष्म्यानिरंतरनिवा
सभूतेतदीयचरणनखसंबाधनप्रशंसनायतामतिपूर्वंहृदिनिजहृदयसंघट्टितेक
स्याश्चिच्चरणपल्लवेहृदयधारणसूचितहृदयस्थपावरणोपेक्षयाबाह्यतोनप्रक
मणधीसूचनायालक्तकदूरणरूपमपवरणंतत्संवाहनलोलुपतयाकुर्वन्निःशंक
तइतिकिंवदाम्यस्यत्रश्रुतामितिलावा।।८।।रमयतिसुदृशंकामपिसुदृशंखलहल

CC0. In Public Domain, Digitizagtion by eGangotri

धरसोदरे। किमफलमवसं चिरमिह विरसं वद सखि विटपोदरे। रमते॥ तथा संनि
हितामपि लक्ष्मीमलक्ष्मीकृतवतः स्वानुरूपामेव कांचनलोचनागोचरं वंचनाचतु
रां रमयमाणस्याकारणपरापकारशीलस्य कामुकस्य विवेकशून्यबलस्य कनिष्ठस्य
कृते इह विटपोदरे विपिनमध्यगततयांधकाराहततया चात्यंतालीकायादृकविरसं
चिरकालावस्थानेनात्यंतलघुतापादकमफलं तस्यान्यासक्त्यानागमनेन दुःखदाय
कं च यथा स्यात्तथा किं किमर्थमवसं उषितवती वद त्वं खलु तज्ज्ञावाहुबंधं वर्जनैयंता
दृशमनर्थमापादितवती किमिदानीं मौनमवलंबसे इति सा वा॥७॥ इह रसभणनेन कृ 

नहरिगुणनेमधुरिपुपदसेवके। कलियुगचरितं न वसतु दुरितं कविनृपजयदेव
के। रमते॥ ॥२५॥ स्पष्टं॥ अज्ञायतस्याः प्रणयोत्तरंगावस्थां प्रदर्शयितुं उक्त्वाग
मनं निह्नुवानां हरिणीमवस्थितां सखीं निजायासवैफल्येन स्वयं ज्ञातोपालंभेन च स
मुदितखेदामवगत्य तामनुनयंती प्रणयनिर्भरमानसा राधा ह॥७॥ नायातः सखि
निर्दयो यदि शठस्त्वं दूति किं दूयसे स्वच्छंदं बहुवल्लभः स रमते किं तत्र ते दूषणं। पश्या
द्य प्रियसंगमाय दयितस्याकृष्यमाणं गुणैरुत्कंठार्तिभरादिव स्फुटदिदं चेतः स्व
यं यास्यति॥१॥ मद्विषयाचरणप्रवणसकलव्यापारसाप्रणयसंगापादितमत्सापघवाः कृ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्मा। निर्दयो निजैकशरणजनजीवितपरित्राणपराङ्मुखोयदिनायातस्त्वन्निवेदितम
दवस्थाश्रवणानंतरमपिनागतस्ततस्त्वंमत्कोरवसंरक्षणन्नतयत्नाकिमर्थंपरितप्य
सेसमागतोपिदृष्टिताहृशोनिर्दयोपसरणाकारणगवेषणाद्रवणात्ऋकांडएवत्रण
यत्नंगंविधायहुनगच्छिन्नतिलघुतामापादयेत्ततोवरमनागमनमेवेतिन्नावा।ननु
चायामीतिमयासहनिर्गता।किमितिनायातइतिविचिंत्यहृद्ये इत्याशंक्याहहेइतिम गी॰टी॰
दर्थहिन्नतद्धुनःस्तुनयतीयातखेदसा।कल्पितोपचारवचनवंचितवन्मानसत्त्वस्मा १२२
शवा।अन्ययाज्ञतसंकेत।यदिनायाता।वदाकारणमनंतरंख्यकेवितश्चवत्वयासहनिर्गा।

त्यापिनागतस्ततस्त्वंमत्समागमकृतविविधाध्यवसाया।किमर्थंपरितप्यसेसमा।
यातोपिताहृशा।शावा।निजसौनागपञ्चकृत्तनपटीयान्तत्त्रणयोन्नरंगमानसा।गो
नस्खलनादिनासंतापमेवाधिकमापादयन्ततोवरमनागमनमेवेतिन्नावा।ननु
वदीयावस्थाबहुशस्त्वंतंकथिता।इतएवकिंसनायात।इतिसदूषणंविचिंत्य
ह्ये इत्याशंक्याहस्वच्छंदमितिनवीनामवतारिका।ननुमदीयंवचोनश्रुतवानत
तोह्ययइत्यतआह।स्वच्छंदमिति।मदनुरोधेनसमागमवर्तिनीमपित्वामनादृत्यनि
रनुरोधबहुवल्लभोरमतेकस्याश्चिच्चित्रकरचनामन्यस्याहारधरणमपरस्या।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यावकरंजनमित्यादिसरसविनोदेनगोपिकालिःक्रीडतितन्नानवसरेतेऽत्युत्क्रम
दनस्थाया।किंइषणंचन्निवदितश्रवणानंतरंतासांस्तुरतउपेक्षापेक्षयाऽस्त्वच
नमेनश्रेयइतित्वांन।।नहुममादितमेतत्संदेनवत्पातथापिवदीयमनस्त्वसमाग
मंविनात्वमात्रमपिस्थातुमशक्तमितिसखीशंकायामाहपश्यपेति।श्रद्येतिसूक्ष्म
स्यापिकालोपाधेर्निमषादेर्दुरितिवाहद्येनस्थूलोपाधिवस्तुकोऽइदानीमिदंचेतो 
तदप्राप्तिक्लिष्टगुणैलाद्योगंसततचिंतनविगलितनेत्रांतरप्रियसंगमायान्तस्त्रा 
नव्यवधानदुःखालिंगनाजनितदंतक्षतवेदनत्वंबनानांकलितकेशापाशाकचग्र

इमहोत्सवादिसौभाग्यशालितयातिमनोहरायसंभोगायदयितस्यातिउत्कंठित
यानिरतिशयप्रेमसंपादनधुरंधरस्यगुणैर्मानिनीजनमनोबेधनसाधनैःसौंद
र्यादिभिरात्मप्रमाणेउक्तंवार्त्तिनरादंतमाउत्कगविरहपीडाधिक्यवशात्तजायमा
नन्नेदमिवसत्यंयास्यति।अनाकृतमनुपदिष्टमठपदिष्टप्रमानमागमिव्रतीत्थितो
पसर्पणसमयंगमिष्यतीत्यवधारयेतितावां।यथाल्पास्यायराधायात्वदेकता
नतांप्रदर्शयित्वासखीतद्नागमनुपस्थिप्तिनायातइति।अवंचनायेमयाबद्ध
धोक्रोपिमनिष्टुणोनायातइतिसख्याउक्तेराधाप्रतिवचनंयदिनायातइतितुनः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कोपयितुंसख्यावचनंस्वच्छंदमित्यादिराधाप्रतिवचनंकिंतत्रेतिचेन्नेतरसखाव
चनमाशंक्यनिर्वेदनिर्भरमानसराधाप्रतिवचनमेवंव्याख्येयं।एवंसखीमनुनयं
ती।निजावस्थामनुसंदधानानिर्वेदातिशयेनमंदानिलमुपालभते॥७॥मनोभ
वानंदनचंदनानिलप्रसीदमेदक्षिणमुंचवामतां।क्षणंजगत्प्राणविधायमाधवंपु
रोममप्राणहरोसिविष्पसि॥१॥विवेकिप्रवात्मीयकंदर्प्पानंदसंवर्द्धनसोहार्द्द गी॰टी॰ १२५
नाह्लादकारिप्रस्ततयाप्रसादेवायोरौचित्यमुक्तंनकेवलमन्यानुरोधेनप्रसादःका
र्यःकिंतुस्वतोपिदाक्षिण्यशालितयातववामतानोचितेतिदक्षिणेत्यनेनोक्तं।एव

मनुनीयापेक्षितंयाचतेक्षणमितिसकललोकनिश्वसननिदानममलस्यदिदृक्षा॥
धीनप्राणनायाःपुरोन्यासंगिनमपिलक्ष्यंविधायनसंदर्शयिनास्येष्यापितुमदग्र
देशसंबंधमात्रंतस्यक्षणानंतरंनिजसंबंधिनांप्राणानांहरणमपिविष्पसिइदंवनुच
याक्रियमाणमपिप्राणहरणेनसेस्यतीतिभावः।किमत्युतंत्रस्यमंदानिलस्यो
पालंभेनबहुरवलावाविपरीत्यापादकंलक्ष्यमेवोपालभ्यइतिमन्यमानाहु।रिपुरि
वसखीसंवासोयंशिखीवहिमानिलोविषमिवसुधारश्मिर्यस्मिन्दहनोतिमने
गते।हृदयमदयेतस्मिन्नेवंपुनर्वर्त्ततेबलात्कुवलयदृशांवामःकामोनिकामनि

Dr. Urmila Sharma Collection, Varanasi

कामनिरंकुशाः ॥ एवमदये सहजनिवृत्तिनिदानवस्तुकौर्यातिशयदेशिकतया
तिनिर्घृणे तस्मिन्नकृदना सर्वस्वेन लोलदयं तदंचनावशीनततया शुष्काशुष्क
विवेकमूढं हृदनर्वत्तानुवर्त्तते प्रथमतो बकुधा उपादेशामनं गीलञ्च तमनुसंधाय
स्वयं निःफला रेंसे ईदृशी बालसंसमांवापितवत् अधुना च निर्वेदादिभिराञ्जष्यमा
णमपिक्षनपसरत् तमाश्रयत् किं वा करिष्यतीति नो वेद्मीति भावः ॥ अथवा नेदं
चित्रमित्याह शङ्कवलयेति मदनदिव्याञ्चूतेंदीवरञ्जतसंघर्षाविरनयनानाम
नोरथो वामाः हः शापविषयमलनमानोपि निजाश्रयदाक्षिण्यपरहितसंतापका ॥ गी॰टी॰ १२५

निर्वेदिसहस्रेणापिंकुशेनमद्य घिरदश्च निर्वर्हयितुमशक्य इति भावः ॥ एवमदय
दूं निरूपयति रिपुरिवेति यस्मिन्मनोगते अदयेमनसोत्प्रेक्षिते अयं सखी संवा
सः समकुः खसुखतया मह्याहि भूताञ्चूतवरकदर्थनिप्राणेन्योपि गरीयान्व
यस्यासहवासः विश्रंलकरः रिपुरिव कुनोति दृशनिष्फलेगदायको न केवलं मामे
व पीडयत्यपि तु कश्यमस्मात् जीवती धैवश्यमाहृशीमवस्थामनुभवतीत्यात्मानं
मपि हनोतीति भावः ॥ तथा हिमानिलः संतापोपशमनस्वभावो नियंत्रणतया
अपाधिकगुणग्राहामंदमारुतोपि शिखीवद्धृतादिप्रज्ज्वलितवह्निरिव मनसापि

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नावयिष्ठंनयानकोलवतीतिभावः॥तथासुधारश्मिवत्सुधाविधरखेदनिरा
करणप्रवणामृतकरःविषमिवैकदेशस्पर्शमात्रेणसर्वांगीणवेदनाकारिका
लकूटमिवस्रष्टुमप्यशक्योव्यथयतीतिभावः॥एवंह्लोपालेनसर्वमात्मानमनु
पातस्यपुननिर्विद्यमनुसंदधानाह॥ ॥बाधांविधेहिमलयानिलपंचबाणप्रा
णान्गृहाणनगृहंपुनराश्रयिष्ये।किंतेकृतांतभगिनिक्षमयातरंगैरंगानिसिं
चममशाम्यतुदेहदाहः॥ ॥मलयानिलपरापकारप्रवणनिरंतरनिवासशालि
न्प्रत्याहतप्रसरमंदसमीरबाधांलोकेक्षसर्पपीडांविधेहिफलान्तुहेशोननि गी॰टी॰ १२६

त्पतयानुतिष्ठतथापंचबाणसकलनिजास्त्रयुतकंदर्पप्राणानुजीवननिदा
नभूतान्गृहाणमयैवपरित्यक्तानंगीकुरु।पुनःपरंतुगृहंतस्यसंकेतवसति
नाश्रयिष्येकिंवदामिनगमिष्यामीति।निवर्तितसकललोकविनाशयमस्वसः
यमुनेचक्रीरस्वतनुतुरतोऽपितत्समामिपिनसहिष्यइतिभावः॥एवंमंदसमार
कंदर्पविलिप्यायतेयोरकिंचित्करत्वंविचार्यलितांतस्वसत्वेनयमुनामतिनिर्विला
मतियाचतेकिमिति।निवर्तितसकललोकविनाशयमस्वसःयमुनेचक्रीरस्व
तुरतसोनागपस्मारकतयाऽङ्खदायिनिक्षमयाकिंत्वीमिमांकथमकस्मान्नाश।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यामीतितितितितिष्ठ्यानकिमपिप्रयोजनंतरंगैस्तुनर्वसर्वस्वव्यंजकेइर्मिन्निरंगानि
त्र्यहमहमिक्यागमनोन्मुखानिलोचनादीनिसिंचतीतदन्निमतेसाधयेत्यर्थः॥ता
यासतिकस्तवोपकारस्तत्पतआह॥ममेतिज्ञञ्ञतप्रणयलंगायादेहदाहत्रासप्र
वुमानसोदाहोमरणनिर्वाणानापियद्यापितयास्यतितथापिबाल्योतरदहिविधदे
हासहनाया॥वरमेकोवाशाम्यतुकिंपानपिलानोलानएवेतिभावः॥एवंनिर्वेदानं गी॰टी॰ १२७
तरंसखीनिराकृतात्पाहितिकृत्याराधातोप्रतिज्ञस्वम्पान्यासंगंजानानापिद्वैकि
मीहवांबालस्रमनुभावयितुंमांजावयसीतिमूर्वयत्याह॥बालेनिलतरलकि

शलयनयनेनातपतिनसाकिशलयशायनेनारमस्वियारमितावनमालिना॥
सखाहितोपदेशेनिवयसेयाविविधविलासशालिनीत्र्यनिलतरलकुवलयन
यनेननिजभावदर्शनोदितसंभोगोकंगाव्यंजकचापलशालिहर्षविस्फारिताव
लोकनचतुरलोचनेनवनमालिनात्र्यलिस्मरणकालोचितपरिमिताजंकारवेश
शालिनीत्रस्त्रेनरमिताविविधसंभोगकेलिप्रार्थनाव्यंजकावलोकनविनोदित
सारसंप्राप्ततडपलालननसौभागपाकिशलयशायनेनसंकेततल्पगोनीतेननवपल्ल
वशायनेननतपतिसंतापंनप्राप्नोतीत्यहमेवप्रियमस्याःप्राणानवन्निकृष्टसकलनिवा

Dr. Urmila Sharma Collection, Varanasi

णोपायामंदलागपाविरहशयनतांनीतेनतेनसंतपामीतिभावः।व्यतिरेकालंकार
॥८॥विकसितसरसिजललितमुखेनास्फुटतिनमामनसिनविशिखेन।सखिग॰।
तथातत्कालानानुमतिसूचकनिजविलाससंदर्शितादितहर्षोत्फुल्लवदनेनतेनय
रमितासावाहुबंधिमंदस्मितेनहर्षोत्फुल्लगद्गदतासानिजाश्रयापाकारिमदनवि
शासनकारिबाणेननलिप्यतेऽहमेवनिराकृतेतरोपायाऽविदग्धाताहशामदनबा गी॰टी॰
णलिप्तापिनद्वैधीभावंयामीतिभावः॥१०॥अमृतमधुरतरमृदुवचनेनाज्वलतिन १२६
मामलयजपवनेन।सखिग॰तथातत्कालोचितसुधामाधुर्यचोरस्यपहारिनमलि

पचतुरेणयारमिताउपलालनवचनेनाउक्तत्वंयाचितासाभूकारणवामनात
कल्पितपाविन्यकंचुकहृतवंचानेकपरेणमंदसमीरणेनदह्यतेऽहमेववज्रीणो
पायांतराप्रतिकूलदैवाताहशेनमंदसमीरेणात्मानंदहंत्यपिनसमसाऽज्ञवामीति
भावः॥११॥स्थलजलरुहरुचिकरचरणेनतपतिनसाहिमकरकिरणेन।सखि॰
तथाविरहसंतापापहारिस्पर्शातिमनोहरकरचरणेनयारमिताकंचुलिकाबं
धिकामोचनव्यापृतकरणाब्राकर्षणव्यग्रसंदष्टचरणेनचसंभोगोऽज्ञादंशापिता
साविरहशीतकरसंपादनलंपटउत्तहिनकिरणसंबंधिवातायनविवरप्रविष्टकि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रणेनात्मानं संतापयंत्यपि निर्वाणं न प्राप्नोमीति भावः ॥ ७ ॥ स्मरज्वलज्ज्वलद्दहनसदृ
यरुचिरेण । दहति न सा चिरविरहज्वरेण । सखि । तथा सकलजनसंतापनिर्वाप
कारिमेघसंघबंधुरगात्रेण या संप्राप्तालिंगना सा वज्रकालोपचीयमानविरहा
ग्निना सर्वान्न दहति । अहमेवानन्यगतिर्निजजीवितेन त्यज्यमानाप्यतया तनाता
दृशेन विरहज्वरेण चेतनाचेतनसाधारण्येन सर्वानपि जनान्भस्मसाद्भावं प्रापयामीति गी॰दी॰
भावः ॥ ८ ॥ कनकनिकषरुचिशुचिवसनेन श्वसिति न सा परिजनहसनेन । सखि । १२९
। तथा संभोगकालानवेगवशसंजातकनकरेखाकारमनोहरस्यरिधनीयशोला

नीयारमिता सा परिचारिकापरिहासेन निश्वासदुःखानुभवति । अहमेव प्रतिकू
लदैवा परिचारिकापरिहासपात्रतां याता जीवामीति भावः ॥ ९ ॥ सकलभुवनजन
वरतरुणेन । वहति न सा रुजमतिकरुणेन । सखि । तथा सर्वलोकातिशायितारु
ण्येन निजोपलालनपरेण या रमिता सा कार्श्यपांडिमादिसंपादिकां पीडां न प्राप्
नोति । अहमवज्ञाणसंचितदुष्परापाकाईदृशं बालसमन्दुःसर्वलासवाजनेक्ष
दर्शयामीति भावः ॥ १० ॥ श्रीजयदेवभणितवचनेन । प्रविशतु हरिरपि हृदयमने
न ॥ ७ ॥ ॥ १२ ॥ सखि । स्पष्टा । एवं राधया प्रलापं निरूप्येदानीं वक्ष्यमाणं तस्याः स्फुरं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हृशनिमद्धसंदधानापांगतिंसूचयति॥७॥प्रातनीलनिचोलमच्युतमुरःसंवीतपी
तांछकंराधायाश्चकितंविलोक्यहसतिस्वैरंसखीमंडले।व्रीडाचंचलमंचलंनय
नयोराधायराधाननेस्वाडुस्मेरमुखोयमहुजगदानंदायनंदात्मज॥८॥ ॥स्वैरस्मेर
मुखोहर्षातिशयसूचकसाभिप्रायहाससहिताननोनंदगोपकुमारःश्रीहरिर्ग।
संतोषायहृयादित्यर्थः।हर्षातिशयकारणमाह।व्रीडेति।कथंममानवधानता गी·टी·
मेतासांविदितंवत्यइतिलज्जयास्तंभुदितचापल्यंराधामुखालियानाहमहमिका १३०
शालिलोचनमुगसंबंधिभ्राजेकंयसंरैनैकलहस्यास्यानिंदातिरेकशोभिराधावद

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दर्शनमहसंदधानः स्मरगतिं सूचयति ॥८॥ प्रातर्नीलनिचोलमच्युतमुरः संवीतपी
तांशुकं राधायाश्चकितं विलोक्य हसति स्वैरं सखीमंडले । व्रीडाचंचलमंचलं नय
नयो राधाय राधाननेस्वादुस्मेरमुखोयमस्तु जगदानंदाय नंदात्मजः ॥ ॥ स्वैरस्मेर
मुखो हर्षातिशयसूचकसाभिप्रायहाससहिताननो नंदगोपकुमारः श्रीकृष्णो वर्ग
संतोषाय भूयादित्यर्थः । हर्षातिशयकारणमाह । व्रीडेति । कथं ममानवधानता
मेतासां विदितवत्य इति लज्जया समुदितचापलं राधामुखाल्लियानाहमहमिका
शालिलोचनयुगसंबंधिप्रान्तैकं यसंरंभैकलक्ष्याख्यानंदातिरेकशोभि राधावद गी॰टी॰ १३०

नेघसंभ्रमवशादिदं संजातमिति उपालंभसूचनपूर्वमपीयं द्रष्टव्यं ॥ व्रीडायां का
रणमाह । प्रातरिति प्रभाते संकेतकुंजान्निर्गमनसमसमये ऽप्यलक्षितो रथ्यांत्रलंस
मयातिपातावगसूचकराधावगुंठनपटान्तलोहरीपतयापीतांबरस्नतोत्तरीयासं
गना व्यवहितपूर्वकाले हरतिश्रांतिवशाकंपमानो रस्थलस्तनविलिखितनखां
कादिगोपनपरां राधां विलोक्य वयस्यामंडले प्रतिनिरोधं हसति व्रीडासमुदयइति
भाव ॥ एकैकस्यापि नीलनिचोलस्य संवीतपीतांशुकत्वस्य च सखीहासहेतुतासू
चनाय चकारांप्रयोगः । नत्वद्यापि विरहाकुलतया या राधायाः कुलं दर्शनमेवनाभि

Dr. Urmila Sharma Collection, Varanasi

कुलस्तरां नोगच्छतस्तमांशातवासोव्यस्यपश्यति इत्यव्याख्याने श्रप्रस्थितुष्यन्नाह्यद्दे।
तियथा। निशिकामप्यानिस्सत्यकेनाप्यविदितो गमिष्यामीति प्रियायातस्तरांनीजा
वरन्नतां वक्तुं वनं तद्दालिंगनसकुंकुमस्तनष्ठदंशाकितोरस्थलनिमूहनार्थं विरचि
तपीतांबरहठवेष्टनं राधामशङ्कीरितिश्रतस्तता सचकितं छद्मजहंक्कारवलोकयंतं त्र
सतश्चैवेहद्विधापराधलक्ष्म निरीक्ष्यकथमयं धृष्टः सस्मचिह्नः किंवदिष्यतिराधां गी॰टी॰
श्रुत्वनविष्यतितच्चरणाघातं श्रुत्वनवत्वनिजाविनयफलमिताहिलकोपितया। २३१
नतिहतप्रसरं सखीजने हसतिनंदगोपकुमारः कथमिमंस्पष्टमपराधंपरिहरिष्या

मि किंवामन्येत प्रियतमेति निजानुचितकरणसमुद्दितव्रीडालस्यंजकंचापलज्ञा
लितं राधावदनान्निमुखतया स्थानुमशक्नुवतोलोचनयोःप्रांतेकथं कथमपि
तद्वदनारविंदंप्रतिवलितधारतांतनिरुद्धकोपलनरासमुद्दिलवदनवैवर्ण्यचूर्णं गादि
विलोकनाविलावितत्कोपोदयेनवंचितधाष्ट्यातिशयापत्रपप्रपावयोर्नंद
सुतादयितुमुखकोयंश्रालीजनहस्त्पनिश्चायसूचकलतातिहासो बहुविधमा
याप्रपंचचतुरः सकललोकपरितोषायत्वया दित्यर्थः॥८॥ इतिश्री शेषकम
लाकरविरचितायां गीतगोविंदव्याख्यायां साहित्यरत्नमालायां सप्तमः सर्गः॥

॥ ॥ब॥ ॥अष्टमं हितमुपक्षिपति॥ अथकथमपियामिनींविनीयस्मरशर
जर्जरितापिसाप्रभातेअनुनयविनयंवदंतमग्रेप्रणतमपिप्रियमाहसाभ्यसू
यं॥ इष्टंवक्ष्यविधप्रलापानंतरंसानंतुच्छूतचरराविविरहव्यथाराधातिस्फुटत
यानतिवाहनीयवक्रप्रदसुतांरात्रिंतादृशाङ्गारवानुनवाहशादिनेवसवक्रम
नप्रार्थनापूर्वमतिवाह्यकिंवदामिस्मरपीडितास्मरशरपीडिताचेतिअपितुराधा गी·गी·
बाधकसंधानसावधानकंदर्पसंबंधियावच्छिशरणकारणबाणविनाव्यमा २३२
नमात्रापिप्रत्यूषेनिलीयावस्थानजनितापराधपरिहारव्यंजकनिजदैन्यावस्था

सूचककाकुवाक्योपक्रमसमसमयस्तयात्पमेवचतुरतांज्ञतप्रणामंनिरूपधि
प्रेमाबंधविषयहृतमपिनिजोपेक्षात्रांतिवशाज्जततयाअभ्यधिकासूयासहि
तंयथास्यात्तथावदतिस्मेत्यर्थः॥ किमवदद्दित्याह॥ रजनिजनितगुरुजागररा
गकषायितमलसनिवेशं॥ वहतिनयनमनुरागमिवस्फुटमुदितरसाभिनि
वेशं॥ हरिहरियाहिमाधवयाहिकेशवमावदकैतववादं॥ तामनुसरसरसी
रुहलोचनयातवहरतिविषादं॥ ध्रुवपदं॥ हेसरसीरुहलोचनचतुरप्रीतिमा
त्रकरणमुग्धस्त्रीजनवंचनाचतुरस्तत्त्वयाचशोपिवंचनाचतुरातवसहजप्रेमा

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बंधान्निजस्य विषादंकपटविलासपारवैकल्यादिति निजविषयोक्तंगान्तरं निर
स्यति तां च छिन्ना वर्जनि च बहुव्यापारामहस रतस्सेवयापराधीनस्य नान्यत्रा
गमनं स्तुक्तमित्युक्ते किमेव बहुपाल्लसे त्र्च हरिह विषण्णा मामित्याशंक्य येनान्न
नितस्य मूढहृदयस्य कस्यापि काप्यप्रतीतिर्नविति ताहशामतिस्फुटकपटव
चनं मावोचः स्तुन्नरेमा वदेत्यादिनोक्ते कथमीहगवस्थैमयितवात्यापि कैतवबु 
द्धिरेवेत्याशंक्य निजसौंदर्यविजित विविधसुंदरीकदंबस्य तव नाहमन्तु रूपा 
येन मया विना तवेहशी दशा संजाता येनेत्यक्षरेया हि केशवेत्यनेन सूचिते किमे

वमतिदारुणैर्वचोवज्रैः खेदयसि कावाममथ्यदन्यान्तु रूपेत्याशंक्याह हे सक
लकामिनीललामभूतायाः सौभाग्यैकनिधानभूताया लक्ष्म्याः पतिर्न वन्न
किमेवमसि धस्सेजानाति सापिनवच्च रितं कावान्नामिमेत्क्कन्नरेह हरि हरीत्यनेन
सूचितं विशेषणानां मालिन्नायायाणां निवेशनात्परिकरः किमेवमात्मा निप्रा
यकाल्पितैरूपालंभैर्दूषयतानरवच्छुतवज्ञत इव विप्रियोहमित्याशंक्य रज
निजनितेत्यादिना निराकरोति। संभोगापर्याप्तिराविष्कृताधिकजागरणा
त्तिनिवेशसंजातारुण्यं पजडतोदिता रक्तसनिमषं तदा यविविधसंभोगासंग

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्तोत्सुपताचुंजकंतछिषयप्रेमाबंधमिवप्रत्यपतामाश्चर्यकिरमतिगौरवेणधार
यतीत्यर्थः॥ ॥कज्जलमलिनविलोचनचुंबनविरचितनीलिमरूपं॥दशनव
सनमरुणंतवकृष्णतनोतितनोरनुरूपं॥हरिहरि॰कज्जलधारणसंजातमालि
न्यवल्लवीनेत्रचुंबनादरसूचकत्वतालिम्पशोभानिलयेऽधरपल्लवंसहजारुणंकृ
ष्णमलिनांगतयौष्ठप्रकटनपटीयसस्तवशरीरसदृशमात्मानंकुर्वन्तंश्यामा गी॰टी॰
गंपवर्धयतीत्यर्थः॥ ॥वपुरनुहरतितवस्मरसंगरखरनखरक्षतरेखं॥मरकत १३४
शकलकलितकलधौतलिपेरिवरतिजयलेखं॥हरिहरि॰तत्संभोगसुलगस्य

तवतन्मनोरथपूरणनिपुणशरीरंविविधसंभोगाटोपजनितचिरकालतदा
सक्तिसूचकतीक्ष्णकरजजनितरेखंमरकतशिलाखंडविन्यस्तरजताक्षरपंक्ति
निर्मितांरतिजयपत्रिकामिवानुकरोतीत्यर्थः॥ ॥चरणकमलगलदलक्त
कसिक्तमिदंतवहृदयमुदारं॥दर्शयतीवबहिर्मदनद्रुमनवकिशलयपरिवा
रं॥हरिहरि॰अन्यसंक्रांतप्रेमाबंधस्यतवेदंमन्नवसंतापकरंयथाकयापिक्रि
यमाणंहृदयमनेकवल्लवीजनावकाशदायिचरणकमलगलदलक्तकसि
क्तंत्वच्चरणयावकदानरूपसमयसमुदितवचनायत्तनिराकरणोदितसपरिहासको

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पञ्चतसरसचरणाघातशालिबहिर्मन्दिनकुसुमनवकिसलयपरिवारांश्चेतरसि
ह वक्षःस्थलके दर्पितरुबद्धिव्याभिपल्लवसंदोहप्रकरयतीवेत्यर्थः॥ ॥दशनपदं
स्तवदधरगतं मम जनयति चेतसि खेदं॥ कथयति कथमधुनापि मया सह तव
वपुरेतदनेदं॥ हरि हरि॥ मञ्जखीवचनोपेक्षाश्वं न्यालिसरणचिह्नशालिन
तव तस्यौढिम्न्यचकंदंतस्तत चिह्नं मामानुहृतचरेहद्विधपरिलिवायाश्चेतसि वि
चित्रयञ्चरित्रविवचनसावधाने मनसि सखीजनोद्वेगापादकं स्तत खेदनावि
लक्षणं दुःखमाविर्भावयतीत्यर्थः॥ वैलक्षण्यमाह॥ कथयतीति तव संकथा गी॰टी॰ २३५

स्वपि न्यसंस्तुतमहत्त्वं तस्य एतदन्यसंभोगचिह्नधारणाद्दर्पनिर्भरं शरीरं मया
सह बद्धचरित्रोद्दर्शितोदित विविधखेदया सममधुनापि कथममनेदं कथयतीश्व
र्वमपराधनिगूहनेनानेदं प्रकाशयन्मोहयित्वाश्मां दर्शोप्रापितवान् अधुना
स्पष्टापराधं निजस्तेन मम वेदनानुल्पादायत्क्षनेदं द्योतयन् कां दशां नेष्यती
ति न जानइति भावः॥ आक्षेपेण वितर्कध्वनिः॥ एवमन्यासंगचिह्नदोषैरुपालब्धस्य
तन्नानादरं निदधाना निजसंकेतभंगकरणेन वंचकतयोपालभ्यते॥ ॥बहिरि
व मलिनतरं तव कृष्ण मनोपि भविष्यति नूनं॥ कथमथ वंचयसे जनमनुगतमसम

Dr. Urmila Sharma Collection, Varanasi

मशरक्षरसुना। हरिहरि॰ इत्यग्रगात्रमलिनहरेतवयुतमङ्गं केतलंगास्यामनो नि
मानैकशालितयातिकविनं चिह्नं निश्चितशरीरमिवात्यंतं मलिनेन विष्यतीत्य
न्यथानन्यगतिकं शरणागतं दीनं जनं नेच्छतीदारुणविशारणकरणबाणमद
नव्याधिसंतप्तं वंचना विषयं कथं कुर्वन् कृष्णसीति भावः। एवं स्वविषयप्रण
यदाक्षिण्यशून्यतयोपालभ्य स्वस्य लाववतो भवान् स्त्रीषु निष्ठुर इत्याह॥ ॥त्वम
तिभवान बलाकवलायवनेषु किमत्र विचित्रं प्रथयतिशतनिकेव वधूवध गी॰टी॰
निर्दयबालचरित्रं। हरिहरि॰ भवान्नियंत्रणारहिततयातिप्रोढाश्च बलाक १३६

बलायमदनपरवशानन्यशरणाकोमलानाशायवनेषु विजनतया निःशंकथ
ध्यापाराहेंसुप्रदेशासु पर्यटतीति नाश्चर्यमित्यर्थः। कुतो नेत्यत आह। प्रथ
यतीति। अकारणस्त्रीवधनिष्ठुरबालत्वं शतनिकेव प्रकाशयतीति विने
द एवायं तवेति भावः॥ ॥श्रीजयदेवभणितरतिवंचितखंडितयुवतिविला
पं। श्रृणुत सुधामधुरं विबुधाविबुधालयतोपि दुरापं॥८॥ ॥२७॥ स्फुटं। एवं
सहजनैष्ठुर्यणोपालभ्य सकलवल्लवीचित्तावर्जकतया भवानादरं विदधा
नामप्येवकथमकस्मादेवं संपन्नोसीति चिंतयंती पुनः स्फुटापराधेनोपा

CC0. In Public Domain, Digitizagtion by eGangotri

त्वनुते॥८॥तवेदंपद्यंत्या॥प्रसरदनुरागंबहिरिवप्रियापादालक्तकच्छुरितमरु
णद्योतिहृदयं॥ममाद्यप्रख्यातप्रणयभररंगेनकितववदालोकशोकादपि
किमपिलज्जांजनयति॥अद्यप्रभृतिवाहृतयादिवसायमाननिमेषसमयेमम
निर्निमेषवदागमनपत्नीक्षिणा॥प्रख्यातप्रणयभंगगानानुचितंखल्वेतत्तम
पाकोपनयाकांवादृशांप्रतिपश्यतेमहद्वियोगेनमहानुलाघोद्रष्टुमिवातंद्र 
नरप्यिद्याणेशामित्याद्यनेकचिंतादुर्वसखीप्रार्थनवद्यातायातादिव्यापार 
सख्यातप्रणयरोषेक्षणेनवंचकस्तदालोकः॥किंवदामिस्वासचिंतादिन्योघि

कमितिअपितुशोकादपिजीवनमरणयोःसंदेहापादिकांब्रीडांजनयतीति
भावः॥तत्रहेतुगर्भंविशेषणं॥यत्हृदयंयद्वसतितयामयाप्तिजन्यताद्वेहृतया
नगतंतदेवंप्रकारांतारणपद्यंत्या॥किंतत्प्रकारांतरमित्यतआह॥प्रसरदि
ति॥अंतरंनवाकाशाबहिःप्रसृतानुरागंव्यंजकमिवप्रियतमाचरणालक्तक
व्यतिकारुणमरुणद्योतिप्रेमाधिककांताचरणाप्रियतमोरस्थलस्पर्शघट्टनकारि
रतिविशेषसूचकमितिभावः॥क्वचित्तवेदंकितवेतिपाठः॥ममएव॥एवंरा
धयाकोपपराधीनयाज्ञतंज्ञस्मोपालंभेनिहृप्यतद्यावर्जनानुकूलसहायंस

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पादनचातुर्यलक्षणस्य वक्ष्यमाणमन्त्रसंदधानःसर्गांतिसूचयति॥ ८॥ कृतमो
हनमौलिहारनिचलन्मंदारविस्रंसनस्तनाकर्षणदृष्टिहर्षणमहामंत्राः कु
रंगदृशां॥ दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां भ्रंशः कंसरिपोर्व्य
पोहयतु वः श्रेयांसि वंशीरवः॥ कंसरिपोर्दुष्टनिबर्हणकारणस्य कृष्णस्य वं
शीरवोतिमधुरतया निरतिशयानंददायी वेणुनिनादो वः श्रोतॄणां श्रेयांसि
अश्रेयांसि व्यपोहयतु वर्द्धयत्वित्यर्थः॥ निरतिशयानंददायित्वोप
पादकं हेतुगर्भविशेषणमेतदिति॥ हृदयहारिविलासचतुरलोचनानां कु गी॰गो॰ १३७

रंगमेहिनमौलिहारनिचलन्मंदारविस्रंसनस्तनाकर्षणदृष्टिहर्षणमहामंत्रा
ः कुरंगस्थितानां विलासिनीनां चित्ताकर्षणनिपुणतया दिदृक्षासंभ्रमोत्पादन
स्य संनिहितानां च तासां तद्वृत्तिप्रायानुरूपं व्यंग्यलंगीतरंगितध्वनिशालि
तया संतोषातिव्यंजक शिरःकंपनतत्सन्मंदारकुसुमकबरीसंयमनानन्तु
संदधानस्य समुदितता दशालावानां च तासां विस्मृतेतरकृत्यतया श्रोत्रमात्र
दत्तसकलेंद्रियव्यापारतया संजाततथाविविधावस्थानां च तासां लोगालिव्यं
जकविकसितदृष्टिस्पष्टीकरणस्य च सिद्धिदायको विचित्रशक्तिसुक्तो मंत्ररत्न

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

थः॥कंसरिपुसंबंधितयासूचितानिष्टविचारणाक्षमं विशेषणेनोपोद्बलय
ति॥दर्पितोयेदानवाअघासुरादयस्तैःपीड्यमानायेदेवास्तेषामनन्यपरिह
रणीयदुःखनिदानविपच्छिनाशासाधारणंकारणंवेणुनिनादाकर्णनसमु
दितरोषावेशाद्दयासुरादयःक्षणमस्तिहुताःतेचलीलयैवतेनहता इतिभा
वः॥८॥इतिश्रीशेषकमलाकरविरचितायांश्रीगीतगोविंदव्याख्यायांसा॥ गी॰टी॰
हित्यरत्नमालायामष्टमःसर्गः॥ ॥८॥ ॥अथसंहितमुपक्षिपति॥तामथ २३९
मन्मथखिन्नांरतिरसभिन्नांविषादसंपन्नां।अनुचिंतितहरिचरितांकलहांत रिता

सुवाचरहःसखी॥अथराधाश्रुतश्लोकपाठेनानंतरंमन्मथखिन्नांधैर्यहिंकारका
